# २३ अथ राजव्यवहारकोशः

## उपोद्घातः

॥ श्रीगणाधिपतये नमः ॥

मदोत्कटकटभ्रमद्भ्रमरवृंदपक्षानिला--
शनप्रमुदितस्फुरत्फणिफणामणिज्योतिषा ॥
घनीभवदनेकपाकृतिमुखे सखे चिंतय
प्रवालदलमंजुलं किमपि तुंदिलं तन्महः ॥ १ ॥
मुक्तादामरुचि क्वचित् क्वचिदपि स्वाराण्मणीभासुरम्
गंगाक्लिन्नजटं क्वचित्सुमरसाक्लिन्नालकं कुत्रचित् ॥
एकत्राजिनभृत्परत्रविमलक्षौमं क्वचिद्वासुकिम्
मंजीरं च पदे क्वचिद्दधदहं सेवेऽर्धयोषं महः ॥ २ ॥
भजेयं शर्वाणीचरणयुगुलं दैवतगणा
नमंतो यच्छोणच्छविसुचिरमालोक्य रुचिरम् ॥
नमद्भक्तस्वांतस्थितगुरुतमः पाटनपटु--
र्भवेद्बालादित्यः किमयमिति तर्कं विदधते ॥ ३ ॥
अधराहितमंजुवेणुनालं
घननीलं व्रजबालिकाविलोलम् ॥
अलकावलिभासमानभालं
कलये चेतसि नंदगोपबालम् ॥ ४ ॥
यस्योरसि रमा भाति चपलेव शरद्घने ॥
सुधांशु धवलाकारं वासुदेवं विनौमि तम् ॥ ५ ॥
चिंतामण्यवतार एव भगवान् यः पावनीरोधसि
ग्रामे चिंचवडाभिधे वितनुते वासं सतामग्रणीः ॥
लोकानुग्रहकारिणं गजमुखध्यानाप्तसिध्यष्टकम्
श्रीनारायणदेवमार्यमनिशं सेवे तमिष्टार्थदम् ॥ ६ ॥
पृथ्वी कदाचिद्यवनाभिधानैस्तिष्यावतीर्णैः किल यातुधानैः ॥
संतापिता सर्वसुराग्रगण्यं लोकेशमागाच्छरणं शरण्यम् ॥ ७ ॥
वशिष्ठमुख्यैर्विहितात्मसख्यैर्ब्रह्मर्षिभिः सन्नुतपुण्यकीर्तिम् ॥
तपोनिकायैः प्रणतं सकायैर्वाग्देवताऽलंकृतदिव्यमूर्तिम् ॥ ८ ॥

कृतावलोकं त्रिदिवेशवृंदे किरीटसंस्पृष्टपदारविंदे ॥
चतुर्मुखं संसदि सत्यलोके पद्मासनं सा सहसालुलोके ॥ ९ ॥
कृतप्रणामाऽथ तदक्षिसंज्ञा ज्ञाताभ्यनुज्ञा निजखेदमुर्वी ॥
विज्ञापयामास न हि प्रभूणामाज्ञांविना कोऽपि वदंति विज्ञाः ॥ १० ॥
लोकेश लोके शयितां कथं वा नावैषि को वैष विभोरुदासः
दीनामनाथामिव बाधते मां हीनाशयोऽयं कलिदैत्यसंघः ॥ ११ ॥
भयादमीषां द्विजदेवतानामर्चाविधौ संप्रति नैव चर्चा ॥ १
धर्मांकुरे दुष्कृतिभिर्विलूने स्वप्नेऽपि नाज्ञासिषि हंत यज्ञान् ॥ १२ ॥
अलं बहूक्त्या ननु दीनबन्धो त्वं मां तथाभ्युद्धर शोकसिंधो–॥
मग्ना यथा दैत्यभयादहं सा पुरोध्दृताब्धेः प्रथमेन पुंसा ॥ १३ ॥
इतीरितः संसदि पद्मजन्मा मृद्व्या समाश्वास्य गिरा धरित्रीम् ॥
साकं तया सर्वसुपर्वभिश्च द्रुतं मुरारेः स जगाम धाम ॥ १४ ॥
तत्रायमाखंडलरत्ननीलं प्रतप्तजांबूनदतुल्यचैलम् ॥
वक्षस्थलोद्भासितकौस्तुभालं कृतस्फुरन्मौक्तिकगुच्छमालम् ॥ १५ ॥
अंगप्रभाभिर्घनमेचकाभिः किर्मीरभूषामणिकांतिजालम् ॥
भुजोपगूढांकनिषण्णलक्ष्मी पीनस्तनाश्लिष्टभुजांतरालम् ॥ १६ ॥
घोरारवक्षोभितसागरांबुं वामेन हस्तांबुरुहेण कंबुम्
दधानमुच्छिन्नकठोरनक्रं सव्येतरेणापि करेण चक्रम् ॥ १७ ॥
अभीतिमुद्रांकितहस्तकंजं देवर्षिगीतामलकीर्तिपुंजम् ॥
शार्ङ्गादिभिः शस्त्रवरैः सदेहैरुपस्थितं दारितदैत्यदेहैः ॥ १८ ॥
सरत्नसिंहासनसन्निविष्टं पुरःस्थितप्रांजलिताक्ष्यजुष्टम् ॥
चराचराणां जगतामधीशं नारायणं कोटिरविप्रकाशम् ॥ १९ ॥
दृष्ट्वा विरिंचिः प्रसृतेन दिक्षुस्तत्तेजसा व्याकुलितात्मचक्षुः ॥
निमील्य चोन्मील्य मुहुः स्वनाम संकीर्त्य साष्टांगमथो ननाम ॥ २० ॥
उत्तिष्ठ वत्सेति सुधातिशायि वचो मुकुंदस्य निशम्य वेधाः ॥
उत्थाय बाष्पाकुलितायताक्षस्तुष्टाव संतुष्टमना मुरारिम् ॥ २१ ॥
जगद्विधात्रे रजसावृताय सत्वेन तत्पालनतत्पराय ॥
संहारकायापि च तामसाय नमो नमस्ते त्रिगुणात्मकाय ॥ २२ ॥
यदंघ्रिनिष्यंदपयः पुनाति यन्नामसंकीर्तनवज्जगंति ॥
यदृग्द्वयीकालमिमं व्यनक्ति नक्तं दिनं चेति नमोऽस्तु तस्मै ॥ २३ ॥
भवानजन्मापि जगद्धिताय मत्स्यादिजन्मानि तनोति विष्णो ॥
अनंतरूपेण बिभर्षि भूमिं सहस्रशीर्षा पुरुषस्त्वमेव ॥ २४ ॥
त्वन्मायया मोहित एष लोकः कलत्रपुत्रादिषु बभ्रमीति ।
त्वदंघ्रिमेकं शरणं प्रपन्नस्तामाशु जंतुः प्रतरीतरीति ॥ २५ ॥

यस्मिन्ननंताः श्रुतयोपि मूकाः खंजानि योगींद्रमनांसि यत्र ॥
तं ते समस्तं महिमातिरेकं स्तोतुं प्रभुः स्यां कथमब्जनाभ ।। २६ ॥
न यावनं दुर्नयजातमेषा सर्वंसहापि क्षमते विसोढुम् ।।
तद्भारमस्याः परिहर्तुमाशु म्लेच्छापहाराय हरे यतेथाः ॥ २७ ।।
उदीरितामात्मभुवा गिरं तामाकर्ण्य मंदस्मितमंजुलास्यः ।।
विचिंत्य भूशर्मविधावुपायं वाचं गभीरां भगवानुवाच ।। २८ ॥
कार्ये महत्यत्र नियोजयामश्चंद्रार्धचूडं वयमेव गत्वा ।
ध्रुवं विधाता हितमस्मदीयं देवो जगत्त्राणधुरंधरः सः ।। २९ ।।
विना तमेनान्न किल यातुधानान् संहर्तुमीष्टे विबुधेषु को वा ।
गाढं तमिस्रासु तमः समस्तं प्रभुः प्रहर्तुं रविरेव नान्यः ।। ३० ।।
इतीरयित्वा हरिरब्धिकन्या हस्तावलंबी सहसोदतिष्ठत् ।।
कैलासशैलं च सुरैः समेतस्तार्क्ष्यं समारुह्य ययादयासीत् ॥ ३१ ।।
उत्फुल्लदृष्टि मुहुरुन्नतकंठनालं शैलं शिवस्य गगनंलिहमुच्चशृंगैः ।
ईक्षांबभूवुरमरा जवनैर्विमानैराकाशभागमवकाशविहीनयंतः ।। ३२ ॥
यश्चंबदंबुददलेन शिरास्थितेन सानुद्वयेन कुहचित् समये विभाति ।।
शृंगाग्रजाग्रदिव(?) कूलविदारणेन जंबालजालमसितं दधदीशवाहः।।३३।।
यत्रेशमौलिहरिणांककरद्रतासु चंद्रोपलालिषु मुहुः स्खलनेन खंजः ।।
विश्रम्य मंदमरविंदवने समीरः क्रीडाश्रमं हरति कुंजगतामरीणाम् ।।३४।।
यत्र वीक्ष्य रहसि प्रतिबिंबान्रत्नभित्तिषु धृतेतरशंकाः ।।
वारयंति सुरते सुरमुग्धाः कामिनो मुहुरपत्रपमाणाः ।। ३५ ।।
यत्र कीचकरवश्रुतितानैः कुंजवेश्मसु हयास्यवितानैः ।
काकलीकृतपिकालिविगानैः स्तूयते मृडयशो मृदुगानैः ।। ३६ ॥
बकुलैः कुसुमाकुलैः प्रियालैरपि यः कूजितकोकिलै रसालैः ।।
निबिडालिकुलैरनेकसालैः कृतमालैरपि भासते तमालैः ।। ३७ ।।
हरिणाः करिणश्च यत्र मूका हरिभल्लूकवृकाश्च दंदशूकाः ।।
जहति श्रुतकिन्नरालिगीता निजवैरं वनजंतवोऽप्यभीताः ।। ३८ ।।
यानादवारुह्य महीधरेशे तस्मिन् जनानंदकरप्रदेशे ।
आसेदुरीशस्य सभानिवेशं प्राप्याथ ते नंदिमुखान्निदेशम् ।। ३९ ।।
जयशंकरपार्वतीशशंभो जगदीशेति शिवं मुहुः स्तुवंतः ।
प्रणिपत्य यथाधिकारमेते विभुनेत्रांचलसंज्ञया निषेदुः ।। ४० ।।
स्वागतं तव हरे समास्यतामत्र पीठ इति विष्णुरादरात् ।
आसने पुरभिदोपवेशितः स प्रणम्य नुतिपूर्वमभ्यधात् ।। ४१ ।।
वीक्षितुं यदहमंबुजासनस्पर्धया कलितकोलविग्रहः ॥
नैव दीर्णसुतलोप्यपारयं हंत तत्पदमपीक्ष्यतेऽधुना ॥ ४२ ॥

दग्धकाममपि वामलोचना सात्कृतात्मकतयाऽतिकामिनम् ॥
त्वां धृतास्थिमपि सर्वमंगलालंकृतं कथमवैमि तत्त्वतः ॥ ४३ ॥
देवदेव रिपवो वसुंधरां पीडयंति यवना भृशातुराम् ॥
तत्कुरुष्व जगतीसमीहितं म्लेच्छवर्गमधुना शृणीहि तम् ॥ ४४ ॥
आकर्ण्य बलिजिद्वाचं निर्वर्ण्य च महीरुजम् ॥
शरण्यः शंकरो वाणीमभाणीन्मधुसूदनम् ॥ ४५ ॥
निहता भवता हरे पुरा ये ननु पौलस्त्यमुखाः सुखाय भूमेः ॥
अहितान् पुनरेव जन्मभाजो जहि तान् प्राप्तनराकृतिस्त्वमेव ॥ ४६ ॥
येषां कलौ दुर्नयमेव सोढुं बुद्धावतारः कलितोमयाभूत् ॥
तेषां विनाशं स्फुटमेव कर्तुमसांप्रतं मे मनुषे यदीत्थम् ॥ ४७ ॥
उपायमप्यत्र वदामि भूमिमवाप्य मन्नामनिगूढभावः ॥
साहाय्यमंशेन पुनर्भवान्या लब्ध्वापि तानाशु सुखेन हन्याः ॥ ४८ ॥
अस्ति प्रशस्तविभवो भुवि भानुवंशे विख्यातभोसलकुलामृतसिंधुचंद्रः ॥
श्रीशाहवर्मनृपतिर्विधिपार्वतीश श्रीशा हविः क्रतुषु नित्यमदंति यस्य॥४९॥
तस्य प्रिया भूपतिभर्तुरार्या रूपेण संतर्जितकामभार्या ॥
साध्वी जिजूर्नाम सुलक्षणास्ते पत्नी दिलीपस्य सुदक्षिणेव ॥ ५० ॥
त्वं शाहपृथ्वीपतिवीरपत्न्यामस्यां समासाद्य मनुष्यजन्म ॥
म्लेच्छापहत्या सुखमारचय्य भूमेः पुनः स्थापय वर्णधर्मान् ॥ ५१ ॥
पार्थंप्रति प्राक् तव धर्महानौ सृजेयमात्मानमिति प्रतिज्ञा ॥
जगत्सुगीतैव तदत्रकार्षीः कार्येऽधुना माधव मा विचारम् ॥ ५२ ॥
तथेति तां पुंगव केतुराज्ञां शौरिः प्रतिज्ञाय सहृष्टचेताः ॥
विसृज्य सर्वानमरान् गृहाय प्रणम्य चेशं स्वगृहान्नियाय ॥ ५३ ॥
अथ पांडुमुखेन सूचितं सा गृहिणी शाहनृपस्य धाम विष्णोः ॥
यवनांधतमिस्रहारि गर्भे शशिनं माघवनि दिशेव दध्रे ॥ ५४ ॥
समये सुदती शुभावहे सा जगतीमानसशर्मनिर्मिमाणम् ॥
सुषुवे तनयं शरीरभासा सहसा हंत जयंतमर्यमाणम् ॥ ५५ ॥
नेदुर्दुंदुभयो मुदाऽथ ननृतुर्देवांगनाश्चारणाः
पुष्पौघं ववृषुर्जगुश्च सुकलं विद्याधराः किन्नराः ॥
भास्वानप्यऽतिभासते स्म परितः शीताश्च वाता ववु–
स्तस्मिन् सर्वजनावनाथकमलानाथेऽवतीर्णे भुवि ॥ ५६ ॥
संस्कारकर्म निखिलं गुरुणा विधाय
बालः शिवेति कृतमंगलनामधेयः ॥
एधांबभूव जनतानयनोत्सवेन
साकं स सौष्ठवपुषा वपुषा शशीव ॥ ५७ ॥

किं भाविदिग्जयमसूसुचदात्मनोऽगै-
बल्ये क्रमादपगते नृपशाहसूनुः ॥
यस्मात्कपाटमुरसा ककुदं वृषस्य
स्कन्धश्रिया भुजयुगेन युगं जिगाय ॥ ५८ ॥
नयनोत्पलमालयैव पूर्वं
वृतमप्याऽर्द्रमधूकमालिकाभिः ॥
तमनन्यजसुंदरं कुमारं
वरयामासुरथ क्षितीशकन्याः ॥ ५९ ॥
कृतोद्वाहः सोऽयं पितुरथ समादायशिरसा ॥
निदेशं भूदेवैः कृतविजयदस्वस्तिवचनः ॥
प्रतस्थे दिक्चक्रं यवनगणसंक्रांतमखिलम् ॥
विजेतुं निःसाणध्वनिबधिरिताशः सहबलैः ॥ ६० ॥
त्वंगत्तुंगतुरंगमक्षुरपुटक्षुण्णक्षितिप्रोच्छल-
द्धूलीधूसरतांबरांगणगणीभूतामराश्चर्यदम् ॥
खड्गत्रोटितकुंभिकुंभविगलन्मुक्तावकीर्णं रणम्
संदष्टौष्ठपुटैर्भटैः सह तदा तस्योदभूद्यावनैः ॥ ६१ ॥
तत्खड्गोत्कृत्तमत्तप्रमुखारिपुगणोद्वृत्तनृत्यत्कबंधै-
र्भल्लाग्रोदस्तमस्तालिभिरपि विकटाभिस्ततं खं समस्तम् ॥
दृष्ट्वोद्यत्केतुराहुप्रकरमिवभयाच्छंकमानस्य भानो-
रुद्दीर्णं बिंबमेव ध्रुवमरिनिकरद्वारभावं बभार ॥ ६२ ॥
दिल्लीशस्याथ पत्तिप्रकरमिषचलद्वीचिमालान् समंता-
दुग्रग्राहौघशंकावितरणनिपुणोद्दामवाहद्विपाद्यान् ।
सेनांभोधीननेकान्वलदीसभुजगोद्दंडदोर्दंडमथ्ना
निर्मथ्योदारकर्मा रणभुवि जगृहे वीरलक्ष्मीः स नैकाः ॥ ६३ ॥
शिवः स्वनामानुगुणं गुणज्ञः
प्रायो निवासं स विधातुकामः ॥
शैलावलिं दुर्गविधानदंभात्
कैलासकल्पामखिलामकार्षीत् ॥ ६४ ॥
क्रमेण जित्वा स दिशश्चतस्रो
राजा शिवच्छत्रपतिः प्रतापात् ॥
निःशेषयन् म्लेच्छगणं समस्तं
पाति स्म पृथ्वीं परिपूर्णकामः ॥ ६५ ॥
यः सिद्धिमावहति चिंचवडाधिवासी
हेरंबपादभजनेन महानुभावः ॥

नारायणाभिधसुधीतिलकादवाप
तस्मादनुग्रहमसौ शिवसार्वभौमः ॥ ६६ ॥
आसंस्तस्य कुलामात्यः शिववर्ममहीभृतः ॥
केचिन्मौद्गल्यावंशाब्धिपूर्णचंद्रा महीसुराः ॥ ६७ ॥
तेषु विख्यातकर्माऽभूत् त्रिमल्लाख्यो युधाग्रणीः
दधते हनुमन्नाम यद्वंश्या विक्रमार्जितम् ॥ ६८ ॥
तस्याऽसीत् तनयो धीमान्यज्वा नारायणाभिधः ॥
यद्यशोराजहंसस्य ब्रह्मांडं पंजरीयति ॥ ६९ ॥
ब्रह्मप्रमोदानुभवे विदेहः
शस्तो नु षट्कर्मविधिः सदेहः ॥
यो दानविस्मारितकामधेनुः–
स्वर्गद्रुचिंतामणिभानुसूनुः ॥ ७० ॥
यस्याध्वरे बुभुजिरे विधिनार्पितानि
हव्यान्यनादृतसुधा विबुधा रसेन ॥
आतेनुरस्वरसतामथ मंत्रपूत–
मास्वाद्य सोममपि सोमकलास्वजस्रम् ॥ ७१ ॥
प्रत्याम्नायः सुरर्षेः प्रतिनिधिरथवा किं दधीचेरयं किं
विश्वामित्रावतारः किमखिलविबुधाचार्यपर्याय एषः ॥
व्यासादेशः किमत्रेः प्रतिकृतिरथवा किं वसिष्ठागमोऽसा—
वित्थं यस्मिन्नुदाराद्भुततरचरिते तेनुरार्या वितर्कम् ॥ ७२ ॥
शुद्धाशयस्याऽभवदस्य सूनुः
सन्मार्गचारी विमलः कलावान् ॥
भूदेववर्यो रघुनाथनामा
पीयूषराशेरिव शीतधामा ॥ ७३ ॥
योऽसौ सुधीगीतगुणप्रकाशो
विश्राणनापूरितयाचकाशः।
यशःसुधाभिर्धवलीकृताशः
कथं न वर्ण्यः कृतवैरिनाशः ॥ ७४ ॥
प्रथित यशसि यस्मिन् संतताभीष्टदान–
व्रतकृतदृढदीक्षे मोदिताऽशेषलोकम् ॥
भुवममरगवी सा वीक्षितुं लज्जमाना
कलयति किमजस्रोत्तानसंचारमभ्रे ॥ ७५ ॥
नारायणात्मा यः साक्षात् कमलाकरसंग्रही ॥
कथं न स्यात् पदाक्रांतबलिप्रत्यर्थिमस्तकः ॥ ७६ ॥

नारायणांशभूतोपि शिवस्य हृदयंगमः ॥
रामोऽस्य सुकवीशस्य न समो भूतकाकविः ॥ ७७ ॥
क्रांत्वा मंत्रबलेन यस्य निखिलामाशामवार्चीं क्रमात् ॥
कर्नाटक्षितिपांश्च भागनगराधीशं च कृत्वा वशे ॥
आसेतुप्रसृतांश्च यावनगणान्नुच्छिद्य तत्रावनी-
पातारं व्यदधाद्यमेव तु शिवः सम्राडमात्यं निजम् ॥ ७८ ॥
तद्राज्यमस्मिन् विनिवेश्य राज-
गिरिं शिवच्छत्रपतौ प्रयाते ॥
शासत् क्षितिं धर्मपरः प्रदाय
वृत्तीः स भूदेवगणानघुष्णात् ॥ ७९ ॥
उत्सादितां चिरतरं यवनैः प्रतिष्ठाम्
शोणाचलेशितुरयं विधिवद्विधाय ॥
श्रीमुष्णवृद्धगिरिरुक्मसभाधिपानां
पूजोत्सवान् प्रथयातिस्म सहात्मकीर्त्या ॥ ८० ॥
कृते म्लेच्छोच्छेदे भुवि निरवशेषं रविकुला-
वतंसेनात्यर्थं यवनवचनैर्लुप्तसरणिम् ॥
नृपव्याहारार्थं स तु विबुधभाषां वितनितुं
नियुक्तोऽभूत् विद्वान्नृपवरशिवच्छत्रपतिना ॥ ८१ ॥
सोऽयं शिवच्छत्रपतेरनुज्ञां
मूर्धाभिषिक्तस्य निधाय मूर्ध्नि ॥
अमात्यवर्यो रघुनाथनामा
करोति राजव्यवहारकोशम् ॥ ८२ ॥
उद्देशाय गृहीताऽत्र म्लेच्छभाषा न दुष्यति ॥
नापेक्ष्यते किं रत्नानि खचितुं जतु जातुचित् ॥ ८३ ॥
विपश्चित्संमतस्यास्य किं स्यादज्ञविडंबनैः ॥
रोचते किं क्रमेलाय मधुरं कदलीफलम् ॥ ८४ ॥

# अथ राजव्यवहार-कोशः *

## १ राजवर्गः

राजा ज्ञेयः पादशाहः स्वामी साहेब ईरितः ॥
अन्तःपुरं तु दरुनीत्याहुर्यवन-भाषया ॥ १ ॥
युवराजा परिज्ञेयो वलीयहद-नामकः ॥
शाहजादा राजपुत्रः प्रधानः पेशवा तथा ॥ २ ॥
अमात्यः स्यात् मजुमूदारः सेनाध्यक्षो हुकूमतः ॥
युक्त्यभिज्ञो दबीर स्यात् सुर्नीसः सचिवस्तथा ॥ ३ ॥
वाकानवीसो वृत्तान्तलेखकः परिकीर्तितः ॥
बहुदेशेष्वधिकृतः कारमुल्की प्रकथ्यते ॥ ४ ॥
उपद्रष्टा तु नाजिरो दाता नाम सखी मतः ॥
सर्खील इति तु प्रोक्तो ध्वज-वृंदाधिकारवान् ॥५ ॥
संदेशलेखश् चिट्णीसो दूतो हेजीब–नामक ॥
सौदागरस्तु धनिकः कार्बारी कार्यपुरुतः ॥ ६ ॥
सबनीसस्तथा सेनालेखकः परिकीर्तितः ॥
मजालसी सभा ज्ञेया न्यायाधीशस्तु आदिलः ॥ ७ ॥
उपमन्त्री मुतालिको गुरुः पीर इतीरितः ॥
शिष्यो मुरिद-नामा स्याद् सिद्धो वलीति शब्दितः ॥ ८ ॥
अफ्ताब इति सूर्यः स्यात् महताबस्तु चन्द्रमाः ॥
आतष्नामा भवेदग्निर्वायुर्बाद इतीरितः ॥ ९ ॥

---

* 'अथ राजकोशो लिख्यते.' पाठभेदः

१ 'उच्यते' पाठान्तरम्.

२ 'सेनाकर्ता' पाठान्तरम्.

३ 'प्रवीणस्तु' पाठान्तरम्.

४ 'वाकेनीसोऽपि मन्त्री स्यात् न्यायाधीशोऽप्यदालतः। कार्मुल्की तु सुमन्त्रः स्यात्सभासत्स्यान्मजालसी' ॥पा०

५ 'सर्खेल इति तु प्रोक्तः कार्यस्यानाधिकारिकः। पाठभेदः

६ 'व्यापारी' पाठभेदः

७ 'पदाति-लेखकः पाव-सबनीस इतीरितः' अधिकतरम्.

८ 'परकर्मी'

९ 'वाव'
'बाव'
'बात' इति पाठभेदाः

अलमाब इति प्रोक्तम् आस्मानाकाशमीरितम् ॥
मेघो बादल-नामा स्याद् बिजली विद्युदुच्यते ॥ १० ॥
दुर्दिनं स्याद् बदहवा मेहुः[११] पर्जन्य उच्यते ॥
ऋषिः पैगंबरो ज्ञेयो योगीशस्तु कलंदरः ॥ ११ ॥
योगी फकीर इत्युक्तः काजी पण्डितनामकः ॥
मुल्ला भट्टः परिज्ञेयो नुजूंमी[१२] ज्योतिषी तथा ॥ १२ ॥
सर्पदारश्चोपदारो वेत्रदण्डधरौ क्रमात् ॥
स्यादन्तर्द्वारपालस्तु दरूबंकी[१३] प्रकीर्तितः ॥ १३ ॥
दौलद्बंकी महाद्वारपाल इत्यभिधीयते ॥
सर्खवासो ऽप्यनुचराधिकारीति निगद्यते ॥ १४ ॥
हुजूरी स्यात्सन्निहितोऽनुचरस्तु महालदार् ॥
हर्कारा सर्वकारी स्याद् अफ्रादः परिचारकः ॥ १५ ॥
चाकरः सेवकः प्रोक्तो नफरः किङ्करः स्मृतः ॥
वेगल्वारो वेगचारो[१४] जासूदश्चारनायकः ॥ १६ ॥
प्रणिधिश् चोरजासूदः खोजा सौविद उच्यते ॥
वार्ताहरो खबर्दारः[१५] परिचर्या तु खिज्मतिः ॥ १७ ॥
गुप्तचारी[१६] तथा चोरहर्कारः[१७] प्रकीर्तितः ॥
खासदारः[१८] पादरक्षाधर इत्यनुवर्ण्यते ॥ १८ ॥
कलाचीधारक[१९] उगाल्दानबर्दार ईरितः ॥
अफ्ताब्गिर्या त्वातपत्रधरश्छत्रधरस्तु यः--॥ १९ ॥
स छत्र्या, चामरधर श्चौरीबर्दार उच्यते ॥
तर्कश्कमानबर्दारो[२०] धनुर्धारी स तु स्मृतः ॥ २० ॥
पासबोन[२१] स्त्वसौ राज्ञो द्वारपाल इतीरितः ॥
पताकाधर इत्येष विज्ञेयश्च निशानदार् ॥ २१ ॥

---

११. ' मेहुं ' साठेप्रत.
१२. ' नुजुमी', 'नुजुमो' साठे प्रत. पाठभेदः
१३. 'हरबंकी' 'हरबंकी' पा० भे०
१४. 'वेगचरो' पा० भे०
१५. 'बखैर्दारः' पा० भे०
१६. 'गुप्तकारी' पा० भे०
१७. 'चोरहर्कारा' पा० भे०
१८. 'खौसदारः','कौस(श)' पा.भे.
१९. 'कलाची-धारकः पीकदानी-बार्दार ईरितः' पा० भे०
२०. 'तर्कश् बार्दार इति यः स तु तूणधरः स्मृतः ।' पा० भे०
२१. 'धनुर्धरः कमान्दारो बंकी तु द्वारपालकः' पा० भे०

मोतब्बर्[22]दार इति च राजमुद्राधरो[23] भवेत् ॥
माहीदारस्तु मकरध्वजी दीपधरा स्तु ते — ॥ २२ ॥
मशाले[24] स्यु,–हिलाली तु प्रदीपधर उच्यते ॥
दीपिका दिवटी प्रोक्ता हिलालस्तु प्रदीपकः ॥ २३ ॥
गुलाम[25] बंदा द्वावेतौ दास-नाम्ना प्रकीर्तितौ ॥
नेजदारः कुन्तधरस् तख्तं सिंहासनं स्मृतम् ॥ २४ ॥
यस्तु तख्तहवाल्दारः स सिंहासनपालकः ॥
चतुष्पदी तु चौरंगश्चौकी त्वासन्दिका मता ॥ २५ ॥
पलंगो मञ्चकश् छप्रपलंगो मञ्चमण्डपः ॥
दोला नाम तु झूलों[26] स्यात् तस्तं गण्डूषपात्रकम् ॥ २६ ॥
पीकदानी-नामनी द्वे पतद्ग्रह-कलाचिके ॥
दीपशाखा तु समयी फिलसोजः स्तम्भदीपकः ॥ २७ ॥
दीपश् चिराग् सीखचिराग् तु ज्ञेयो रोपण[27]दीपकः ॥
स्यादन्तरालदीपस्तु खंदील[28] इति नामतः ॥२८ ॥
उत्सोजः स्याद्धूपतरु[29]रुद्दानी धूपपात्रकम् ॥
मैणकोशस्तु मोमदानी मोम्बत्ती मैणवर्तिका ॥ २९ ॥
शिबिका पालखी डोली सुखासनमिति द्वयम् —॥
तुल्यं भाषाद्वये, दीपनडिं स्याद्बाजर्षां[30]निति ॥ ३० ॥
विलासो मौज नामा स्याद्गोशा त्वन्तःपुरस्थितिः ॥
स्त्रीजातिस्तु जनानी स्यान् मर्दः पुरुष ईरितः ॥ ३१ ॥
दृष्टिप्रियस्तु नुर्चश्मो सरायंदो[31] तु गायकः ॥
कलावंताभिधा वेश्या मेहरी[32] वनिता मता ॥ ३२ ॥
नाट्यस्त्री सुरता[33]ख्या स्वरूपं तु शबी स्मृतम् ॥
उष्णं तु गरमं शीतं ठंडा स्वेदस्तु खोय् स्मृतः ॥ ३३ ॥

---

२२. 'बार्दार' सा० प्र०
२३. 'ज्ञेयो ध्वजधरो बुधैः'पा. भे.
२४. 'दिवटे' पा. भे.
२५. 'गुलाम बंदा फर्जंदा दासच-ण्डप्रचण्डकाः '। पा. भे.
२६. ' दोला--नामा तु डोल्हारा ' पा०भे०
२७. 'रोपणदीपकः' पा. भे.
२८. 'कंदील' पा० भे०
२९. ' दीपतरुः' पा. भे.
३०. 'वाजवानिति' पा. भे.
३१. 'गायकस्तु गुनीजनः' पा. भे.
३२. मूळ 'मह-रू '=चंद्रानना.
३३. 'वनिताभिख्या' पा. भे.

# २ ॥ कार्यस्थानवर्गः ॥

कार्यस्थानं तु कार्खाना-नामतः परिभाषितम् ॥
कोशागारं खजाना स्याज् जामदारः कोशरक्षकः ॥ ३४ ॥
यस्तस्य तु हवाल्दारः कोशपालः स ईरितः ॥
अधिकारी सैनिकानां सर्हवाल्दार नामकः ॥ ३५ ॥
निक्षेपस्तु दफीना स्याद् दास्तानं सचितम् स्मृतम् ॥
व्ययस्थानं खर्चपोतं तदीयस्तु हवालदार्—॥ ३६ ॥
व्ययाधिकारी, तस्यैव जामदारो व्ययकिङ्करः ॥
तत्रत्यो निविसिंदा यः स भवेद् व्ययलेखकः ॥ ३७ ॥
पोतदारो नाम बुधैर्ज्ञेयो द्रव्यपरीक्षकः ॥
द्रव्यं तु नख्त-संज्ञं स्याद् वराटो होन उच्यते ॥ ३८ ॥
तदर्धं तु प्रतापः स्याद् भाषयोरुभयोरपि ॥
वराहपादो धरणश् चवलस्त्वष्टमांशकः ॥ ३९ ॥
दुवलः षोडशांशः स्यान्मोहरा तु बुधैः स्मृतम्- ॥
सुवर्णनिष्कं, रजतनिष्कं स्याद् रूपयाभिधम् ॥४०॥
वाच्या रजतवर्ती त लाहरी फलमः पणः ॥
ताम्रद्रव्यं तु खुर्दा स्याद् बस्तनं बन्धनं स्मृतम् ॥ ४१ ॥
कर्दनं तु परिज्ञेयं त्रोटनं सूक्ष्मदृष्टिभिः ॥
रत्नशाला जावहीरखाना तस्य हवालदार्- ॥ ४२ ॥
रत्नाधिकारी, जाम्दारो रत्नभृत्यः प्रकीर्तितः ॥
भवेद्रत्नपरिक्षस्तु जोहरी भूषणं नगः ॥ ४३ ॥
तुराऽवतंसः पद्कं ज्ञेयं वै कतकाभिधम् ॥
ग्रैवेयकं धुग्धुगी स्यात् कुडक्या कर्णभूषणम् ॥ ४४ ॥
सीस्फुलं तु शिरःपुष्पं भांग्लीली तु ललामकम् ॥
तिलकः स्याद् बिजवरा नासापुष्पं तु बेसरम् ॥ ४५ ॥

---

१. ' सर्वाधिकारकः प्रोक्तः ' पा. भे.
२. ' वराहो ' पा. भे.
३. 'कर्तन् ' पा. भे.
४. ' कृतकाभिधम् ' पा. भे.
५. ' कर्णकुण्डलम् ' पा. भे
६. ' भांग्तिला ' पा. भे.
७. 'नासापत्री तु बेसरं' पा. भे.

नासामणिर्नथो मुक्ताफलं मोती फुलीति तु— ॥
नासापुष्पं, बाहुमणिर्बाजूबंदाभिधायकः ॥ ४६ ॥
अङ्गद [8]तोर्लबंदः स्यान्मणिबन्धः तथा जवे ॥
पहुंच्या स्यान्मणिकटो मुद्रिकात्वंगठी मुदी ॥ ४७ ॥
शस्तमंगुष्ठकं हस्तकडें स्याद् हस्तकङ्कणम् ॥
कार्णिका स्यात् तानवडं वांकी कूर्परभूषणम् ॥ ४८ ॥
[9]तथा मोहनमाला तु ज्ञेया प्रालम्बिका बुधैः ॥
कटिसूत्रं जर्कमरो [10]घुंगुरः किङ्किणी स्मृता ॥ ४९ ॥
जंजेरिया शृङ्खलिका पैंजणें नूपुरं स्मृतम् ॥
पोल्हारा तु तुलाकोटिर् बाला हंसकनामकः ॥ ५० ॥
हिरा तु वज्रं माणिक्यं लालो नीलः समोद्वयोः ॥
[11]पांचो गारुत्मकमणिः पुष्परागः समोद्वयोः ॥ ५१ ॥
स्याद् वैदूर्यं लसणिया गोमेदोऽप्युभयोः समः ॥
गुली नाम प्रवालः स्याद् बिलोरः स्फटिको भवेत् ॥ ५२ ॥
[12]हुमा पक्षोद्भवा या तु कल्गी पक्षावतंसकः ॥
काचसारस्तु मीना स्यात् सफापः काच ईरितः ॥ ५३ ॥
जरखा[13]ना स्वर्णशाला सुवर्ण जर-नामकम् ॥
रौप्यं रूपा तथा ताम्रं तांबा पित्त[14]लकं पितल् ॥ ५४ ॥
स्यात् संगबसरि धातुविशेषः रसकाभिधः ॥
कांसे कांस्यं सिसे सीस कथिलं वंगमुच्यते ॥ ५५ ॥
कालायसं तु पोलादः स्याल्लोहमुभयोः समम् ॥
जाम्दारखाना तु वसनागारं तस्य हवालदार्- ॥ ५६ ॥
वस्त्राधिकारी, तत्रस्थो जाम्दारो वस्त्ररक्षकः ॥
निविसिंदा त्वस्य वस्त्रलेखकः परिकीर्तितः ॥ ५७ ॥
शिरोवेष्टनमित्येतन्मुंडासा कञ्चुकं झगा ॥
मंदीलं नाम विशेयमूष्णीषं स्वर्णरौप्यजम् ॥ ५८ ॥

---

८. 'तोलबंदी स्यात्' पा० भे०

९. 'ज्ञेया मोहनमाला तु बुधैर्ज्ञेया प्रलंबिका' पा० भे०

१०. 'घुंघुरः' पा० भे०

११. 'पाचिर' पा० भे०

१२. 'उमा मौक्तिकनामः स्यात्' पा० भे०

१३. 'जर्गखाना स्वर्णशाला स्वर्ण रजतनामकम्' पा० भे०

१४. 'पित्तालिकं पितल्' पा० भे०

कटिबन्धः **कमर्बंदो विजा**रूर्ध्वमुखी भवेत् ॥
**चादरः** स्यात् प्रावरणी निचोलो **दुतु**-नामकः ॥ ५९ ॥

[15]कार्पासकञ्चुको नाम **डगला** पान्थकञ्चुकः— ॥
ज्ञेयः **फतू** नाम बुधैः **कुडती** कूर्परकञ्चुकः ॥ ६० ॥

**तिरमा** पार्वतीयोर्णा **पल्लोदार**स्तु पल्लवी ॥
**सलायी** तु शलाकी स्यान् **म्याना** मध्यमईरितः ॥ ६१ ॥

**किनारा** तु प्रदेशः स्यात् **कस्बी** हेमगुणान्वितम् ॥
सौवर्णतान्तवं **नग्दी पटेदार**स्तु रेखितः ॥ ६२ ॥

**भर्जरी** स्वर्णभरितं गन्धाली **चर्मपोस्तनी** ॥
ऊर्णावस्त्रं तु **शालः** स्याच्छशोर्णे **तोष**-नामकम् ॥ ६३ ॥

**दुर्मा** तु राङ्कवं ज्ञेयं **सखलाद्** द्वीपकम्बलः ॥
इन्द्रगोपस्तु **मखमल् ताफ्ता** कौशेयनामकः ॥ ६४ ॥

**सोनेरीनिलखः** स्वर्णपटो रौप्यपटस्तथा— ॥
**रुपेरीनिलखश् छींटं** चित्रवस्त्रमुदाहृतम् ॥ ६५ ॥

यद् **बुटेदारनिलखः** स पुष्पितपटः स्मृतः ॥
पुष्पितोर्णा **चिकंदोजी शाला**ख्या परिभाषिता ॥ ६६ ॥

**खिसा** तु गोपकमुपावरणं **दुपटा** भवेत् ॥
**पासोडी** द्विपटी ज्ञेया **साडी** स्त्रीवसनं तथा[16] ॥ ६७ ॥

अन्तरीयं **तोह्बंद**[17]**श्चोली** कूर्पासनामिका ॥
**पाटावूं**[18] चित्रकौशेयं दुकूलं[19] **मुकटा** भवेत् ॥ ६८ ॥

**गोशपेचः** कर्णबन्धः स्याद् **दुस्ता** स्याद्वस्त्रपञ्चकम् ॥
नीशारो नाम **फर्गोलो** वराशि**र्बुरुखा** तथा ॥ ६९ ॥

**तोसदानं** जविनकं **संदूक**स्तु समुद्गकः ॥
समूरुचर्म गदितं **सामरं** नाम कोविदैः ॥ ७० ॥

ज्ञेयं सुवासचर्मेति **बुलगारा**भिधानकम् ॥
**तिमाचा**ऽविकचर्म स्याद् वस्तुनिर्माणनाम तु— ॥ ७१ ॥

**रासकर्दन**मित्युक्तं **बेतणि** रूपिकाभिधा ॥

---

१५. 'कार्पासकंचुकं' पा० भे०
१६. 'स्मृतं' पा० भे०
१७. 'तहबंद' पा० भे०
१८. 'पटावूं' पा० भे०
१९. 'कौशयम्' पा० भे०

भवेदरत्निमानं तु गञ्जमञ्जू[२०] तूल आयतम् ॥ ७२ ॥
भवेद्‌र्जस्तु-विस्तारो द्व्यरत्निर्गज ईरितः ॥
अरत्निः स्याद्‌र्धगजस् तसू द्व्यंगुलमुच्यते[२१] ॥ ७३ ॥
पूर्वभागः पृष्ठभागःकञ्चुकस्य क्रमात् स्मृतौ– ॥
पेशपुस्तौ, तथा जेहेपटी कण्ठपटी भवेत् ॥ ७४ ॥
अस्तनी नामबाहा स्याद् दुटा बाहुकमुच्यते ॥
बाहामुखं मोहलं स्यात् खपवा पार्श्वकं विदुः ॥ ७५ ॥
दौरोदावणमित्येतद्‌द्वयं परिकरः स्मृतः ॥
तखृता खण्डः कशा बन्धश् चीनः स्यात् कटिकूर्चनम ॥ ७६ ॥
प्रान्तस्यूतं तु नेफा स्यान्मोठा तु स्थूलमुच्यते ॥
सूक्ष्मं बारिक-नाम स्याच्छ्‌लक्ष्णं नरम-नामकम् ॥ ७७ ॥
पलंगपोश इति यः स प्रच्छदपटः स्मृतः ॥
कौशेयजातं नर्मीना वस्त्रजातं तु कापडम ॥ ७८ ॥
उर्णाजातं तु पश्मी स्यात् सोखता नाम पटच्चरम् ॥
आच्छादकस्तु सर्पोशो वसला चेलखण्डकः ॥ ७९ ॥

---

# ३ ॥ भोग्यवर्गः ॥

अथ पाकालयं मुद्‌बखख्वानेति[१] परिभाषितम् ॥
मुद्बखी पाककारः स्याच् चासणीकार नाम तु–[२] ॥ ८० ॥
रुचिग्राहिः, पाकपरीकर्मी तु स्याद् दवादवी ॥
रेसोयी[३] स्यात्तु सिद्धान्नं कंदोरी त्वन्नमुच्यते ॥ ८१ ॥
आब्दाखाना जलस्थानं सक्का तु जलदः स्मृतः ॥
पशुभस्त्रा पखालः स्यान् मशकः स्कन्धभस्त्रिका[४] ॥ ८२ ॥
डोलो जलहरश्चर्मभृङ्गार श्छागलः स्मृतः ॥
अस्तावा नाम भृङ्गारी कुजा कर्करिका मता ॥ ८३ ॥

---

२०. 'गुम् गञ्जु तूल आयतिः', 'गुंजजुंतूल आयातिः' पा' भे.
२१. 'द्व्यंगुल उच्यते' पा० भे०
१. 'खाना इत्येव भाषितम्' पा. भे.
२. 'रुचिकारः' पा. भे०
३. 'रसोयी स्याद्रसवती'. पा० भे०
४. 'मेषभस्त्रिका' पा० भे०

औंडे नाम तुला प्रोक्ता कूजादान् मुदपञ्जरः ॥
आडेकरी तुलावाहः पखाली जलवाहकः ॥ ८४ ॥
हौदँ नाम जलाधाने दीर्घिका बाव-नामिका ॥
पाणशालाँ निपानं स्यात् कूपो नाम भवेत् कुवा ॥ ८५ ॥

पानकादिरसस्थानं शर्बत्खाना प्रकीर्तितः ॥
फलजातं तु मेवा स्यात् खुष्तरं खाद्यवस्तुनि ॥ ८६ ॥
काह्वा नाम विश्रामकषायः परिभाषितः ॥
अफीम् नामा हि फेनः स्योदवलेहं तु मोरबः ॥ ८७ ॥
मदद्रव्यं तु कैफः स्यात् सुधा शरबतादिकम्[१०] ॥
प्याला तु चषको ज्ञेयः शीसा नाम भवेत् कुपी ॥ ८८ ॥

धूमयन्त्रं गुडगुडी तमाखू धूमपत्रकम् ॥
अथोपस्करपात्रं[११] तु तबकं परिकीर्तितम् ॥ ८९ ॥
खुषबोय् इति तु प्राहुः सुगन्धिद्रव्य-नामकम् ॥
कस्तूरी मुष्कमित्युक्ता मात्सिकं त्संबरं विदुः ॥ ९० ॥
चोवा त्वगरुसारः स्याद्गेजा यक्षकर्दमः ॥
जवादी नाम मार्जारमद इत्यामनन्ति हि ॥ ९१ ॥

गुलालः स्याद्रक्तचूर्णम् अबीरं गन्धचूर्णकम् ॥
अत्तरः पुष्पसारः स्याद्वस्तुसारोऽर्के नामकः ॥ ९२ ॥
मकरन्दो गुलाबः स्यात् केसर जाफरा भवेत् ॥
मल्लीतैलं मोगरेलं चेंमली[१२] जातितैलकम् ॥ ९३ ॥
तथा चम्पकतैल तु चांपेलमितिकीर्तितम् ॥
ऊदो धूपो लिप्तपात्रं[१३] मर्तबानमितीरितम् ॥ ९४ ॥

---

५. ' मीजान् इति तुला प्रोक्ता मुर्दा मृतकलेवरम् ' पा० भे०

६. ' हौदनाम तटाकः स्याद्दीर्घिका बाविनामिका ' पा० भे०

७. ' हौदखाना ' पा० भे०

८. ' सुधास्थानं तु शरबत्खाना तस्य हवालदार् । सुधाकारः परिज्ञेयो मेवा स्यात् खाद्यवस्तुनि ॥ फलजातं तु तमेव भंगनाम कलिंजकम् ॥ ' पा० भे०

९. ' अवलेह्यम् ' पा० भे०

१०. ' शरबताभिधा ' पा० भे०

११. ' अथोपहारपात्रं तु ' पा० भे०

१२. ' चंबेली ' पा० भे०

१३. ' ऊदो धूपः काचपात्रम्. ' पा० भे०

सुरागारं[14] शराब्खाना सुरादाता शराबदार् ॥
पट्टी[15] स्यादल्पताम्बूलः सैव बर्ग इतीर्यते ॥ ९५ ॥
तंबूलदान-पर्यायः करङ्कः परिकीर्तितः ॥
चुनालः स्याच्चूर्णपात्रं पूगस्फोटी[16] तथाऽङ्किता ॥ ९६ ॥
चूना नाम भवेच्चूर्णं दस्ता स्यात्पर्णवेष्टनम् ॥
स्यादौषध-चय-स्थानं[17] दवाखानेति तं विदुः ॥ ९७ ॥
तबीबस्तु भवेद्वैद्यः सीर्शा[18] रोग इतीरितः ॥
बीशी[19] मृत्युः परिज्ञेयो दारूनामौषधं भवेत् ॥ ९८ ॥
उपचारस्तु तर्तीबस् तष्कीसस्तु[20] चिकित्सनम् ॥
व्यथा जह्मतिनाम निधनं फौत-नामकम् ॥ ९९ ॥
खल्बता इति यत्तत्तु खल्वोपलमिति स्मृतम् ॥
शिकार्खाना पक्षिशाला शिकारी मृगयुर्मतः ॥ १०० ॥
जनावरं पक्षिणः स्युः शिकारं मृगया भवेत् ॥
हंसनाकः पक्षिरक्षी व्याघ्रः शेर इति स्मृतः ॥ १ ॥
स्याद्द्वीपिपालश्चित्तवान् चित्ता तु द्वीपिनामकः ॥
स्यादथास्तरणागारं फराश्खानाभिधानकम् ॥ २ ॥
हवाल्दारस्त्वास्तरणाधिकारी तस्य कीर्तितः ॥
तथास्तरणकश्चापि फराशः परिकीर्तितः ॥ ३ ॥
खाबगा स्याद्वस्त्रगृहं शामीना तु वितानकम् ॥
राहुटी स्यात् पटकुटी चांदणी श्वेतमण्डकः ॥४॥
स्यादश्वमण्डपः सायवान्[21] डेरा दूष्या प्रकीर्तिता ॥

---

१४. 'पर्णागारं—पर्णदस्तु शराबदार्' पा. भे.
१५. 'दस्तेकरी पर्णवाहस्ताम्बूलं तु भवेत्पटी.' पा. भे.
१६. 'पूगच्छेदी' पा. भे.
१७. 'रसायनमहालस्तु रसायनगृहं भवेत् रसायनी नाम तस्य हवाल्दारः प्रकीर्तितः' पा. भे.
१८. प्रर्जी रोग इतीरितः' पा. भे.
१९. 'अन्त्यकालो भवेन्मृत्युः' पा. भे.
२० 'चिकित्सा तु दवा मता' पा. भे०
२१. 'सावान्' पा० भे०

दूष्यामुखं पेश्परदा मोघलं पा[22]र्ष्णिकं विदुः ॥ ५ ॥
दूष्यामध्यं तु कांसा स्यान् नौगजी राजमण्डपः ॥
परदा स्याज्जवनिका बाडं काण्डपटं विदुः ॥ ६ ॥
प्रतिसीरा सि[23]रांचा स्यात् कलंद्री व्योममण्डपः ॥
प्रस्थानमण्डपः पेशखानेति परिभाषितः ॥ ७ ॥
ख्याता कूर्चितचर्मेति चरमूदोजी मनीषिभिः ॥
खांबः स्तम्भो बा[24]ड्रूसं तु स्तम्भपीठमुदीरितम् ॥ ८ ॥
तनावः स्यात्तु तनिका शङ्कुर्मेख इतीरितः ॥
खुर्तनावा तथा पादतनिकाः परिकीर्तिताः ॥ ९ ॥
लंगरो मुख्यतनिका मेखसो शङ्कुरोपणी ॥
सलिता भारवेष्टः स्यात् कसणी कर्षणी भवेत् ॥ ११० ॥
लगडः स्यान्मङ्कणिका भारारोपस्तु लादणें॥
जमखानाभिधं सूत्रासनमाहुर्मनीषिणः ॥ ११ ॥
चित्रासनं तिवाशी स्यात् सुजनी पुष्पितासनम् ॥
पृ[25]ष्ठोपधानकं लोड तकया तु मृदुलो भवेत् ॥ १२ ॥
अवन्तरोपधानं तु गाल्उशीत्यादिकं भवेत् ॥
शिरोपधानकमुशी बालिस्तमुपबर्हणम् ॥ १३ ॥

---

## ४ ॥ शस्त्रवर्गः ॥

शस्त्रागारं जिरात्खाना तदीयस्तु हवालदार् ॥
शस्त्राधिकारी नाम स्यादधीन स्तु हवाल्गिरः ॥ १४ ॥
निविसिंदा शस्त्रलेखो हत्याराभिधमायुधम् ॥
ईली तु बागदारः स्यात् फिरंगस्तु भवेदसिः ॥ १५ ॥

---

२२. 'पार्श्वकम्' पा० भे०
२३. 'सिरायूचा' पा० भे०
२४. 'बाद्रसं' पा० भे०
२५. 'तक्या नामतामित्येत-न्मृदुलासनमुच्यते ॥
उपधानं तु लोंड स्यात्
बाजू पार्श्वासनं विदुः ॥
तक्या पृष्ठोपधानं स्यान्
न्याइली कशिपुर्भवेत् ॥ पा० भे०

गुर्दो नाम भवेद्वज्रं सैफः खड्गः प्रकीर्तितः ॥
निमचा तु कृपाणः स्यात्कत्ती तु करवालिका ॥१६॥
जम्दाडो यमदंष्ट्रः स्यान्निस्त्रिंशो दुदुमा स्मृतः ॥
गुप्ती तु गुप्तशस्त्रं स्यात् पट्टा पट्टीशमुच्यते ॥१७॥
गुर्गुर्जो[26] तु गदा सोटा मुद्गरो[27]ऽथ श्रिकंबि च ॥
कठारिका कटारः स्यात् फरसी परशुः स्मृतः ॥१८॥
कौक्षेयकं तु खंजीरो बाणः स्यान्मण्डलाग्रकः ॥
भाला भल्लस्तथा बर्ची शक्तिः प्रासो भवेदिटा ॥१९॥
स्यात् कातरिः कर्तरिका सुरी[28] स्यादसिधेनुका ॥
शार्ङ्गः कमान इत्युक्तं धनुर्नाम भवेद्धणू ॥ १२० ॥
मौर्वी चिल्ला धनुष्कोटिर्गोसो[29] तीरस्तु सायकः ॥
तूणीरस्तर्कशः पंजा त्वङ्गुलित्राणमीरितम् ॥ २१ ॥
गोधाचर्म तु दस्ताना त्सरुः परज ईरितः ॥
करजापरजो मुष्टिर्गांज्या त्सरुशिखा भवेत् ॥ २२ ॥
स्यात्त्सरोःकशिपुर्गोदी मोसुभा त्सरुवेष्टनी ॥
दस्तनी मुष्टिरज्जुः स्यादङ्गुल्याधार अंतरा ॥ २३ ॥
फालकं म्यान मब्नालो भवेत् फलकमेखला ॥
तह्नाल इति प्रोक्तं[30] यत्तदग्र-पिधानकम् ॥ २४ ॥
सलः स्यान्मेखलाबन्धः स्याच्छस्त्रावरणं हुदा ॥
शस्त्रालम्बः खजीना स्यात् कटिचर्म तु पद्दळें ॥ २५ ॥
खेटकं नाम ढालः स्याच्चन्द्रकाः स्युस्तथा फुल्या ॥
दस्तावेजो भवेद्ग्राहः जिराहिः[31] कवचं विदुः ॥ २६ ॥
दंशनं तु जिरे[32] नाम बख्तरं वर्म[33] कीर्तितम् ॥
चेहल्खतं तनुत्राणं जानुबंधो द्वयोः समः ॥ २७ ॥

---

२६. 'गुर्गुजस्तु' पा० भे०
२७. 'मुद्गरो वृश्चिकंबि च' पा० भे०
२८. 'च्छुरिः स्यादुभयोः समा' पा० भे०
२९. 'गोषा' पा० भे०
३०. 'प्राहुः' पा० भे०
३१. 'शिलां तु' पा० भे.
३२. 'शिले' पा० भे०
३३. 'चर्म' पा. भे.

कसणी स्यात्तु रसनं पत्रे तु स्यादुरच्छदः ॥
घुगी नाम शिरस्त्राणं टोपः शीर्षण्य-नामकः ॥ २८ ॥
घोणात्राणं नाम बिनी पट्टी तु रदबन्धनी ॥
यन्त्रव्यूहस्त्वराबा स्याद्बाणोऽग्निनलिका भवेत् ॥ २९ ॥
नालीकं बरखंदाजं नलीयन्त्रं तु बन्दुखम् ॥
तोफ नाम भवेदुल्का दारू नामाग्निचूर्णकम् ॥ १३० ॥
लघुयन्त्रं जबजंगं जम्बूरा तु शताग्निका ॥
दीप्तिनीडं भवेत् काना गोलंदाज् यन्त्रवेधकः ॥ ३१ ॥
तालिम्खाना मल्लशाला मल्लो जेठी समीरितः ॥
कुस्तीनाम नियुद्धं स्याद्बलशिक्षा तु तालिमम् ॥ ३२ ॥
सिंहावलोको बागजस्तो मेला स्याच्छस्त्रशिक्षणम् ॥
मेलकारस्तथा शस्त्रविद्यायाः परिशिक्षकः ॥ ३३ ॥

---

# ५ ॥ चतुरङ्गवर्गः ॥

गजशाला फीलखाना गजः फील इति स्मृतः ॥
हत्तिणी तु करेणु स्याच् छावा कलभ उच्यते ॥ ३४ ॥
महावतो निषादी स्यान् नोबती गजपालकः ॥
गजकिङ्कर नामा स ज्ञेयो यस्तु गडेकरी ॥ ३५ ॥
कक्ष्या किलावा नाडा तु स्थूलरज्जुः प्रकीर्तितः ॥
झूलिः कुथा लंगरस्तु निगडोऽन्दुः समो द्वयोः ॥ ३६ ॥
आलानं तु भुनासः स्याच् चमेटी पादपाशिका ॥
दन्तकुन्तः सनीना स्याच् चवडोलस्तु कोविदैः ॥ ३७ ॥
गजमण्डप इत्युक्तो, हौदा नाम गजासनम् ॥
पागा स्यान्मन्दुरा नाम मिराखोरोऽश्वरक्षकः ॥ ३८ ॥
खासदारस्त्वश्वधरश् चाबुकस्वारोऽश्वशिक्षकः ॥
हमू-नामा तु पर्यायी शाहतीरस्तु जांघिकः ॥ ३९ ॥
रिकेब्दार स्तोत्रधरः काबाडी घासवाहकः ॥
खुरत्रबन्धकश्चापि नालबंद इतीरितः ॥ १४० ॥

---

३४. 'स्यात्सारसनम्' पा०भे०
३५. 'भांडें नाम महायंत्रं दारूनामाग्निचूर्णकम् । उल्का नाम हुका गोलंदाजः स्याद्यंत्रवेधकः' ॥ पा०भे०

अन्तर्झूलिः[1] परिस्तोमो ग्रीवाबन्धो दवासनम् ॥
निगालो गडखोलाख्यः स्याद् भोंवरकडीति[2] तु-॥ ४१ ॥

निगालवलयं, स्याच्चमङ्ग शिरो-दंशवारणम् ॥
पायबंदः पादबन्धो मुजुमा नाम पाशकः ॥ ४२ ॥

दस्कला[3]-नामकश्चर्मनिगडः परिभाषितः ॥
बुधनालस्तथा लोह-निगडाभिध उच्यते ॥ ४३ ॥

सरोसरः प्रोथचर्म लगामः स्यात् खलीनकम् ॥
खलीन-रश्मिर्विशेयस् तुकमानेति[4] नामतः ॥ ४४ ॥

खोगीरं नाम पल्याणं जीनं तु गारतुसनम् ॥
तुरगासनपक्षस्तु दावणं परिभाषितम् ॥ ४५ ॥

तस्याग्रतन्तवश्चापि पुतफेति समीरिताः ॥
तुरगासनपृष्ठं तु भीडनं ब्रुवते जनाः ॥ ४६ ॥

तुरगासनशुण्डा तु हुणा नाम बुधैः स्मृता ॥
पुरोबन्धः पेशबंदो जेबंदस्तीक्ष्णताडनी[5] ॥ ४७ ॥

कुक्षिरज्जुः शिकाबंदः सावता जघनपत्रकम् ॥
फुंदणा नाम गुच्छः स्याद् हरडा तु मणिः स्मृतः ॥ ४८ ॥

किङ्किणी चंग-नाम्नी स्यात् सडका तत्तु[6] चामरम् ॥
तथा पुरःकिङ्किणिका जलाजलमितीरिताः ॥ ४९ ॥

सर्दाली स्याच्छिरश्चर्म लालें स्यादोष्ठबन्धनम् ॥
आरोहिणी रिकीबः स्यात्तस्याश्चर्म रिकीबदाल् ॥ १५० ॥

दुम्ची-तंगौ पुच्छबन्धः कश्यबन्धौ क्रमात्स्मृतौ ॥
स्यात्कश्यबन्धवलयम् नाम्ना तगकडीति[7] च ॥ ५१ ॥

पुस्तंगस्तद्वरत्रा स्याद् ह्यासा ग्रन्थिचर्म च ॥
स्यादश्वकवचं पाखर्गाशा नामोपरिच्छदः ॥ ५२ ॥

स्याल् लगामपटा त्वश्वमुखभूषण-नामकः ॥
ताजा-नाम त्वश्वमुखकवचं कवयो विदुः ॥ ५३ ॥

---

१. ' अलझूलि ' पा० भे०
२. ' भोंवरस्याकडीति तु ' पा०भे०
३. ' दब्कला ' साठेप्रत.
४. ' मुसन्नकमितीरिताः ' साठेप्रत
५. ' नम्रबंधनम् ' पा० भे०
६. ' त्वश्वचामरम् ' पा० भे०
७. कुक्षिबंधवलयं नाम्ना तंग इति प्रथा ' पा० भे०

सनीनमश्वशृङ्गं स्याड् ढक्का तबल-नामिका ॥
अनीनं कण्ठरज्जुः स्याद् हुमा त्वश्वावतंसकः ॥ ५४ ॥
सर्जा सिंहस्तोडरं तु वीरकङ्कणमुच्यते ॥
कंडा तु कण्ठभूषा स्याद् बिरुदं चिन्हमीरितम् ॥ ५५ ॥
आकर्षणी कौंहडनी कपोयी मलमार्जनी* ॥
चोटिया नाम वेण्यः स्युरितमामं तु मर्दनम् ॥ ५६ ॥
मुखाकर्षस्तु काजा स्यात् खरारा त्वश्वघर्षणः ॥
ज्ञेयं कवलपात्रं तु तोबरा-नामक बुधैः ॥ ५७ ॥
खुरत्राणं तु नालः स्यात् नालमेखस्तु कोविदैः-॥
खुरत्र-शङ्कुः कथितस् , तरटं तु महाकशा ॥ ५८ ॥
कोरडा ताडनी चाबुक् कशा स्यादथ खांकरम्-॥
झर्झरं, स्याद्वेगसारचर्म किमुशान-नामकम् ॥ ५९ ॥
पशुचर्म त्वाधवडी छागचर्म तु सागळम् ॥
गुल्फत्राणं तु दाभोटा नवारो मञ्च-गुम्फिनी ॥ १६० ॥
दालो भवेत्तान्तविकमथ कौशेय तान्तवम्-॥
रेशीमुदाल स्तथा सूतीदालः स्यात् सूत्र-तान्तवम् ॥ ६१ ॥
गोफो गुम्फितरज्जुः स्यादथाश्वगतिरुच्यते ॥
भ्रमणं नाम कावा स्याद् एडी रेचितमुच्यते ॥ ६२ ॥
धौरितं तुरकीचाली वल्गितं दुडकीति च ॥
प्लुतं छात्रर्कमित्युक्त धारा निःशंकधावणें ॥ ६३ ॥
नीला कर्कः परिज्ञेयः शोणो बोर इति स्मृतः ॥
श्यामलस्तु कुमैतः स्याद् अंबरी मेघवर्णकः ॥ ६४ ॥
कर्बुरस्त्वबलखो नाम जरदा पिङ्गलः स्मृतः ॥
अब्रशो व्याघ्रवर्णः स्यात् करडा नाम पाटलः ॥ ६५ ॥
रह्वालः सैन्धवः स्याद् इराखी यावनः स्मृतः ॥
अरब्बी स्यात् पारसीकः कच्छी जवन उच्यते ॥ ६६ ॥
मुजन्नसो विजातीयो बाल्हीको जहरी स्मृतः ॥
मद्रजस्तु भवेत्ताजी पर्वतीयस्तु टांकणः ॥ ६७ ॥

---

X. ' स्याद्धडणी ' पा० भे०
* ' मल्ल-मार्जनी, पा० भे०
८. 'सातकर्य चालीस्यात् वा-
रा निःशंक धावणें ' पा० भे०
९. ' शुभ्रः ' पा० भे०

तेजस्वी तु भवेत्तेजी **तुरकी** वल्गनः स्मृतः ॥
वडवा **मादवानः** स्यात् **नाकंद**स्तु किशोरकः ॥ ६८ ॥
स्थौरी नाम भवेत् **तट्टू** हेषा नाम तु **हिंसणें** ॥
घोणः **पेशलवो** नाम सटा नाम भवे**द्याल्** ॥ ६९ ॥
स्यात् पुरस्तुरगः **कोत्वाल्** यामिकाश्वस्तु **पाहरी** ॥
**बालेतंगो**त्तराबन्धो **दाबः** पार्श्वे इतीरितः ॥ १७० ॥
रथशाला तु **वहिलीमहाल** इति कीर्तितः ॥
**वहिली** स्यात् प्रवहणं **वहिल्वान**स्तु सारथिः ॥ ७१ ॥
**गाडा** शकट इत्युक्तः प्रतोदम् **दुमणी** भवेत् ॥
**षुतुर्खाना** तूष्ट्रशाला स्यादुष्ट्रः **षुतुरा**भिधः ॥ ७२ ॥
**पैलाण**मुष्ट्रपल्याणं **सार्वान**स्तूष्ट्रकिङ्करः ॥
**आलमखाना** वाद्यशाला **दमामो** दुन्दुभिः स्मृतः ॥ ७३ ॥
आनकस्तु **नगारा** स्याद्भेरी **ढोल** इतीरितः ॥
पणवस्तु **नफेरी** स्याच्छृङ्गं **गोमुख**[12]मीरितम् ॥ ७४ ॥
आनद्धस्तु **तुरारी**[13] स्याद्**बंका** नाम तु काहला ॥
वाद्ययन्त्राणि **वाजंत्रें** कम्बुः **कर्णा** प्रकीर्तितः ॥ ७५ ॥
**पांवा** वेणुर्मड्डुकं तु **डफडें** डमरुर्हुडुक् ॥
**खालूनगारा**श्ववाद्यम् **समेळो** डिण्डिमः स्मृतः ॥ ७६ ॥

---

## ६ ॥ सामन्तवर्गः ॥

सामन्तस्तु **वजीरः** स्यात् सैन्यं **लष्कर**मीरितम् ॥
**सर्नौबत** स्तुसेनानी**र्जुम्लेदारः** शताधिपः ॥ ७७ ॥
भवेत् **पंचहजारी** च चमूपालाभिधानकः ॥
तथा **जमातदार**स्तु समुदायी निरूपितः ॥ ७८ ॥
साहस्रिको **हजारी** स्याद् व्यूहः **फौज** इतीरितः ॥
**बारगीर** स्त्वश्ववहो **हुल्स्वार**[14]स्तु पुरःसरः ॥ ७९ ॥
**शिलेदारः** स्वतुरगी **सिपायी** योधनामकः ॥
**तिरंदाज**स्तु धानुष्को **बर्चीवाल**स्तु शाक्तिकः ॥ १८० ॥

---

१०. 'तुरगी' साठेप्रत.
११. 'जहाज' पा० भे०
१२. 'गोपुरमीरितम्' पा० भे०
१३. ' ' साठेप्रत तुतारा.
१४. हुयल्स्वारः पुरःसरः पा० भे०

पदातिसैन्यं **हशमं प्यादा** पत्तिः प्रकीर्तितः ॥
तत्र **सनौबतो** यस्तु दलवाही स ईरितः ॥ ८१ ॥
पत्तिस्तोमी तु **जुम्लेदार** पत्तिपालो **हवालदार्** ॥
यत्तु **नायिकवाडी** तु पत्तिनायकनाम तत् ॥ ८२ ॥
तत्रात्यस्तु **सुभेदारः** पदात्यध्यक्ष ईरितः ॥
**भालेकरी** कौन्तिकः स्यात् प्रासिकः स्याद् **इटेकरी** ॥ ८३ ॥
सेनामुखं **फौजरू** स्याच्छिबिरं **गोठ** उच्यते ॥
सेनागुल्मं तु **गोलः** स्याच् **छबीना** रात्रिरक्षणम् ॥ ८४ ॥
अन्यासारस्तु **चेंदोलो रास्ता चंपा** च पार्श्वयोः॥
**तलावा** स्यात्पर्यटनं **स्वारी** स्वैरगतिर्भवेत् ॥ ८५ ॥
**मुकामः** स्यादवस्थानं प्रस्थानं **कूच**-नामकम् ॥
**शबा** सौप्तिकनामा स्याद् **गिर्दं** वेष्टनमीरितम् ॥ ८६ ॥
आवेशो **हुलुकः** प्रोक्तो **जखमं** क्षतमीरितम् ॥
**दोस्तः** सुहृद् **गनीम्** वैरी **सल्ला** संधिः प्रकीर्तितः ॥ ८७ ॥
**बिगाडो** विग्रहः प्रोक्तो **नामूजादिः** स्यादभिक्रमः ॥
**आसरा** त्वाश्रयः प्रोक्तः **फितवा** भेद ईरितः ॥ ८८ ॥
**वशिहत्**सान्त्वनं **पन्दो** दण्डो **दौडस्तु** धावनम् ॥
**लढायी** तु भवेद्युद्धं **शिकस्तस्तु** पराभवः ॥ ८९ ॥

---

# ७ ॥ दुर्गवर्गः ॥

दुर्गे **किल्लेति** विज्ञेयं गिरिदुर्गे **गडः** स्मृतः ॥
प्राकारः **कोट** इत्युक्तो **जंजीरा** द्वीप उच्यते ॥ १९० ॥
भृगुपातः **कडेलोटः कडा** तु भृगुनामकः ॥
दन्तको **गडकोनः** स्याद् **बुरुजः** कोट्टगुल्मकम् ॥ ९१ ॥
उपत्यका तु **माची** स्याद् **बालेकिल्ला** त्वधित्यका ॥
प्राकार-वेदिका **फांजिः** परिखा **खन्दकः** स्मृतः ॥ ९२ ॥
**रेवणी** नाम परिखा--वलयं परिभाषितम् ॥

---

१. 'परिस्तोमिति' पा० भे०
२. 'नाईकवाडिति' पा० भे०
३. 'अत्रत्यस्तु' पा० भे०
४. 'हरोलः स्यात्' पा० भे०

पडकोटस्तथा सद्भिः प्राकारवलयं स्मृतम् ।। ९३ ।।
**जंग्या** प्राकार-रन्ध्राणि **चर्या** प्राकार-फालिकाः ।।
**जीभि**र्हस्तिनखाख्या स्याद् **अगळा** त्वर्गला मता ।।९४।।
**वेढा** परिधिनामा स्यात् **मोर्चा** स्यादुपसर्पणम् ।।
**अलंगः** परिरक्षा **स्यान्मेटः** *स्यादुपरक्षिका ।। ९५ ।।
स्यात् साहसाधिरोहस्तु **सुलतानढवा**भिधः ।।
**मगबिंबा** नामविशैराश्मियन्त्रमुदाहृतम् ।। ९६ ।।
**धमधमा** प्रतिगुल्मः स्यात् **सुरंगं** विवरं स्मृतम् ।।
यामाटनं तु **गस्ती** स्याद् गस्तिर्यामिक उच्यते ।। ९७ ।।
**घांटगस्तिस्तथा** घन्टायामिकः परिभाषितः ।।
सामग्री नाम **सामानं जकीरा** संग्रहः स्मृतः ।। ९८ ।।
**अम्बार्खाना** धान्यकोशो **गल्ला** धान्यमितीरितम् ।।
**कारखाना** तु संभार-गृहमाहुर्मनीषिणः ।। ९९ ।।
संभार-लेखकः **कारखाननीसः** प्रकीर्तितः ।।
**हवाल्दारस्त**त्रमुद्राधिकारी परिभाषितः ।। २०० ।।
ज्ञेयः प्राकारपालस्तु **तट्सनौबत** नामकः ।।
**इमारति-हवाल्दारो** भवेच्छिल्पाधिकारिकः ।। १ ।।
÷**गौंडी** तु भित्तिशिल्पी स्यात्पलगण्डस्तु **बेलदार्** ।।
**गिलावा** लेपनामास्याच्छिल्पकार्य**मिमारातिः** ।। २ ।।
**संगत्रास**स्त्वश्मभेत्ता +**खंमीर**श्चूर्णकर्दमः ।।
***गडेकरी** स्यात् पाषाणवाहकोऽथेष्टका **इटा** ।। ३ ।।
**कौलें** तु खर्पराणि स्युश् **चिरे** तु घटितोपलाः ।।
अश्मकूपस्तु **टांकें** स्यान्निर्जरस्तु **झरा** भवेत् ।। ४ ।।
**दिवाणवाडा** स्याद्राजमंदिरं **सदरः** सभा ।।
कुमारसदनं **खानजादेवाडा** इति स्मृतम् ।। ५ ।।
मंत्रैस्थानं **गुसुल्खाना** चतुष्कं **चौक**-नामकम् ।।
**हरंमहालः** शुद्धान्तः कक्ष्या **बंध** इतीरितः ।। ६ ।।

---

५. 'धान्यस्य संहतिः' पा० भे०
६. 'संगरात,' 'संगरास' पा० भे०
+ 'खंमीर' * 'गडेकरी' पा० भे०
७. 'स्नानस्थानं' पा० भे०
❀ 'मेढस्यादुपरक्षणम्' पा. भे.
÷ 'गौंडा' पा० भे०

देहली देव्हडी नाम्नी दरवाजा तु तोरणम् ॥
झरोखे स्युर्गवाक्षाणि माडी स्यादुपकारिका ॥ ७ ॥
चन्द्रशाला नाम सज्जा सोपानं तु जिना[८] भवेत् ॥
[९]बालंगरेज इत्येतद्वलीकं नाम संस्मृतम् ॥ ८ ॥
कारंजें [१०]जलयन्त्रं स्यादुत्[११]सेधो बन्धनामकः ॥
प्रणाली तु पनाळः स्याच् चौकटी द्वारबंधिका ॥ ९ ॥
झडपा तु कपाटं स्याद् उंबरा स्यादलिन्दकः ॥
कुलुप लोहपाशः स्यात् कुञ्चिका तु भवेत् किली ॥ २१० ॥
वातायनं सुराखः स्यात् कुड्यनीडं तु मेहराब् ॥
वेदिकानाम चौत्रा स्यात् मैदानं तु प्रशस्त-भूः ॥ ११ ॥
भवेदुपवनं बागो रस्ता रथ्या प्रकीर्तिता ॥
क्रीडावनं तु खास्बागः [१२]शय्यास्थानं तु खाबगा ॥ १२ ॥
तारत्खाना मलस्थानं भंगी मलहरः स्मृतः ॥
कुदळी नाम कुद्दालः पावडें स्यात् खानित्रकम् ॥ १३ ॥
कुऱ्हाडिस्तु कुठारः स्यात् कोयिता छेदकः स्मृतः ॥
[१]आसादस्तु भवेत् तेषा क्रकचः कर्वतः स्मृतः ॥ १४ ॥
इळा. दात्रं पहारस्तु फालः खुर्पें तृणक्षुरम् ॥
निश्रेणिस्तु शिडी चढ्णें ज्ञेयमारोपण बुधैः ॥ १५ ॥

---

## ८ ॥ लेखनवर्गः ॥

दफ्तरं लेख्यशा[१]ला स्याद् दफ्तर्दारस्तु लेखकः ॥
नविसिंदा[२] लेखकः स्याद् यारेदी हस्तकः स्मृतः ॥ १६ ॥
रख्तवानो मषीकारो मषी शायी प्रकीर्तिता ॥
भवेल्लेखनपात्रं तु कलम्दानाभिधानकम् ॥ १७ ॥
लेखनी तु कलम् दौतिर्मषीपात्र्यथ मुद्रिणी—
शिकेदौति स्तथा डीकदानी निर्यासपात्रकम् ॥ १८ ॥

---

८. 'पायरी भवेत्' पा० भे०
९. 'बारंगरेज' साठेप्रत.
१०. 'जलसूनं' साठेप्रत.
११. 'उत्सो घबधवामूत' पा. भे.
१२. 'क्रीडास्थानं इवास्मृतं' पा. भे.
× 'पाजी' पा० भे०
१३. 'असिदस्तु भवेत् तीषा' पा० भे०
१. 'लेख' पा० भे०
२. 'नवाशिंदा तु निशितो' पा. भे.

**किताबः**[2] पदवी नाम **फर्मानं** राजपत्रकम् ॥
पुस्तकं तु **किताबः** स्याद् **हिशोबो**[3] व्ययलेखनम् ॥ १९ ॥
**मोहस्बा** लेखशुद्धिः स्यादायो नाम भवेज् **जमा** ॥
व्ययः **खर्चः** परिशेयः **शाहिरू** वेतनव्ययः ॥ २२० ॥
राजव्ययस्तथा विशैस् **तहवोलिरिति** स्मृतः ॥
**अडीसेरी** धान्यभृतिर्वेतनं तु **मुशाहिरा** ॥ २१ ॥
**तुमारं** तु समाहारो निर्यातिर्**झडती** भवेत् ॥
**जाबिता**[4] नाम तु बुधैर्दोषनिर्णय उच्यते ॥ २२ ॥
स्यान् **निजेर्जाबिता**[5] नाम दोषनिर्णयपत्रकम् ॥
**वांटणी** स्याद्विभजनं विभागस् **तकसिमाभिधः** ॥ २३ ॥
देय-शेषस्तु **मेबादं** भिन्नं स्यात् पितृनामनि ॥
तथा दापितशेषस्तु **गैर्आदा** नामतः स्मृतः ॥ २४ ॥
कोविदैः **कर्जहसना** ऋण–ग्रहणमीरितम् ॥
**कर्जदादन**मित्येतदृणदानं प्रचक्षते ॥ २५ ॥
भवेदृणपरावृत्तिर्नाम **कर्जगिरिफ्तनम्** ॥
**रदकर्जं** नाम बुधा ऋणनिर्यातनं विदुः ॥ २६ ॥
श्रेष्ठो[6] **गिरामी** विज्ञेयो **जमानः** प्रतिभूः स्मृतः ॥
**गोही शायीद** इति च द्वे ज्ञेये साक्षिनामनी ॥ २७ ॥
**फायिदा** च **नफा** च द्वे विज्ञेये लाभनामनी ॥
**ऐनं** मूलधनं ज्ञेयं **कुशीदं व्याज**-नामकम् ॥ २८ ॥
प्रतिदानं **फेरदेणा** न्यासस्तु **रखणा** मतः ॥
द्रविणानि तु **पैके** स्युर्द्रव्यं **नख्तमुदाहृतम्** ॥ २९ ॥
सर्वस्वं तु **बिसादिः** स्याद्धनं **माल** इतीरितम् ॥
**इतबारस्तु** विश्वास **इमानः** सत्यभाषणम् ॥ २३० ॥
श्रुतं **दखल** नाम स्याद् विस्मृतं **गफ्लतं** विदुः ॥

---

२. ' फर्मानं राजपत्रं स्यादेष्टपत्रं कितावातिः ' पा० भे०
३. ' लेखनामकः ' पा० भे०
४. ' नेजानाम बुधैर्दोषनिर्णयः परिभाषितः ' पा० भे०
५. ' स्याद्वैनजाबिता नाम० ' पा० भे०
६. ' गिरो प्रतिनिधिर्ज्ञेयो ' पा० भे०

तत्कालः फीलहालः स्याद् हालीं सांप्रतमीरितम् ।। ३१ ।।
माजी नाम भवेत् पूर्वे कूटघातो दगा स्मृतः
खस्तह् क्लेशस्तथा कार्यश्रमो नाम मशाकतिः ।। ३२ ।।
उधारः स्यादायतिकं रोखं तादात्विकं विदुः ॥
लायको योग्यः कुवत् शक्तिः फिसाति वैशसंगतम् ।। ३३ ।।
हलाल्खोरः स्वामिकार्यतत्परः परिभाषितः ।।
स्वामिद्रोही हराम्खोरः सिफलो क्षुद्र ईरितः ।। ३४ ।।
एकाकी तु जॅरीदा स्यात् सकलस्तु तमाम् स्मृतः ।।
गम्यं पहूंच इत्युक्तं कजाकः साहसी स्मृतः ।।३५ ।।
मजन्ना नाम संदेहो निःसंदेहो बिलाकुसूर् ।।
सामर्थ्यं कुदरत् ज्ञेयं दिलेरो धृष्ट ईरितः ।। ३६ ।।
सख्ती शक्तिः सख्तशीरः शक्तिमान् परिकीर्तितः ।।
सख्तः शक्तो बख्तवारो भाग्यवान् परिभाषितः ।। ३७ ।।
मबादा तु कदाचित् स्याद् बजाम् नामोपरिस्मृतमम् ।।
अंमा नाम परंतु स्यात् [११] पुन बअद तु स्मृतमम् ।। ३८ ।।
ईन [१२] स्यादेतदित्यर्थे [१३] वाह्वाः स्यादुत्तमोत्तमम् ।।
समीचिनं दुरुस्तं स्याद् हरगीज तु सर्वथा ।। ३९ ।।
धूर्तो हरीफ-नामा स्याद् हैवानः पामरः स्मृतः ।।
चपलो [१४] जुॅंदतरः स्यात् सैतानस्तु पिशाचकः ।। २४० ।।
शौर् विवेकोऽथ प्रज्ञा तु वकूफः कुशलं शुकुर्* ।।
बेवकूफस्तु मूढः स्यान्मूर्खो बेअकलः स्मृतः ।। ४१ ।।
उत्तमं स्याद्वल् नाम मध्यमं दुम् प्रकीर्तितम् ।।
कनिष्ठं सीम् परिज्ञेयं चाहरम् स्यात्तथाऽधमम् ।। ४२ ।।
मख्फी रहस्यं गदितं सफा निर्मलमुच्यते ।।

---

७ 'प्रमादस्तु दगा स्मृतः' पा० भे०

८. 'ल्याखो योग्यः कुबल् शक्तिः' पा. भे.

९. 'इंजाई क्षुद्र ईरितः' पा. भे.

१०. 'जरारा' पा. भे.

११ 'पुनर्मा—र्बा अदजः स्मृतं' पा० भे०

१२. 'अजः' पा० भे०

१३. 'वाह्वा' स्तूत्तमोत्तमम् पा. भे.

१४. 'जुलहालः' पा० भे०

* 'सुघर पा. भे०'

मुद्दतिर्दिनक्लृप्तिः स्यादवकाशस्तु फुर्सतिः ॥ ४३ ॥
निर्मूलं नेस्त-नाबूदं सिनाजोरी उरोबलम् ॥
ख्वाही नख्वाहि इत्येते इच्छानिच्छे प्रकीर्तिते ॥ ४४ ॥
विशे बांर्दिगरी नाम बोध्यमेतदनन्तरम् ॥
बासी पर्युषितं ज्ञेयं ताजा नूतनमुच्यते ॥ ४५ ॥
म्लानं सुका इति प्राहुर्जल्दं शीघ्रं प्रकथ्यते ॥
सर्वार्थो हरबाबः स्याद् वस्तु स्याज् जिनसाभिधम् ॥ ४६ ॥
विप्रलापस्तु बद्गोयी हमेशा स्यान्निरन्तरम् ॥
आवश्यकं त्वलबता अनुकूलस्तु बेहतर् ॥ ४७ ॥
अवक्कलस्तु संकोचो गंजः संमर्द ईरितः ॥
*अवसाफो भवेत् ख्यातिस् तारीफः स्तुतिरीरिता ॥ ४८ ॥
राबिता नाम संचारः संलग्नं भीड-नामकम् ॥
निगा संरक्षणं ज्ञेयं भर्त्सनं तु फजीहतम् ॥ ४९ ॥
बिभीषिका दटावणी स्याद्दाटा स्याद्भयदर्शनम् ॥
लंगं शून्यं समस्तं सब् दस्तं कैदं च निग्रहः ॥ २५० ॥
हस्तस्पर्शो दस्तपोशी मुलाखत् दर्शनं स्मृतम् ॥
पादस्पर्शः कदम्पोशी मिल्ना त्वालिङ्गनं स्मृतम् ॥ ५१ ॥
शिरसावन्दनं शिज्दा प्रणामस्तीस्लमा भवेत् ॥
नमस्कारः सलामः स्यादाशीर्वादो दुवा स्मृतः ॥ ५२ ॥
ऐकीनः स्यात्तथा निष्ठा सत्यं सच्चा इति स्मृतम् ॥
मिथ्या झूटम् किलाफस्तु कपटं सुष्टु खूब् स्मृतम् ॥ ५३ ॥
महत्त्वद्योतकं तत् स्याद्यन्मशारूनिले इति ॥
मजकूरं तु नचित्वे अज्जमः श्रेष्ठ-वाचकः ॥ ५४ ॥
स्यात् स्वयं दस्तमेतत्तु मन्हामतमितीरितम् ॥
अव्लादः पुत्रसन्तानमफ्लाद दुहितृसंततिः ॥ ५५ ॥

---

१५. 'खोहि नखोहि' पा० भे०
१६. 'दहॉल् शीघ्रं प्रचक्षते' पा.भे.
१७. 'अनुकल्पस्तु' पा० भे०
* 'परिपूर्णस्तु' संजूदा खोई—शाख्या तु वासना' अधिकतरम्.
१८. 'कदम् चप्सी' पा० भे०
१९. 'अकीदः स्यात्' पा० भे०
२०. दस्तमजरा मन्हामत' पा० भे०

बिरादरस्तु बन्धुः स्याज् ज्वानस्तरुण ईरितः ॥
ननवादस्तु बालः स्याद् बुड्ढा वृद्धः समीरितः ॥ ५६ ॥
शाहगिर्दस्तु शुश्रूषु र्वस्तादोऽध्यापकः स्मृतः ॥
नैवेद्यस्यार्पण[21] फात्या स्नानं गुसुल-नामकम् ॥ ५७ ॥
पञ्चाङ्गक्षालनं वज्जू अभ्यङ्गस्तु हमाम् स्मृतः ॥
स्याच् चंदरोज इति यत् कतिचिद्दिन-नाम तत् ॥ ५८ ॥
अतिक्रान्तं तु गुजरान् शेयं प्रायः खुसूसनम् ॥
भवेदभयहस्तस्तु दस्तपंजाभिधानकः[22] ॥ ५९ ॥
बर्खुर्दारश्चिरंजीवी स्यादायुरुमराभिधम् ॥
महालस्तु भवेद्देशः प्रासादो महलाभिधः ॥ २६० ॥
कारागृहं बंदिखाना बेडी स्यात् पादशृङ्खला ॥
तोकस्तु गलपाशः स्याद्बन्धमोक्षस्तु बंद्खलास् ॥ ६१ ॥
विभ्रान्तं[23] गलथः प्रोक्तो गाफीलः प्राकृतः स्मृतः ॥
तहकूपं स्थापितं स्यात् प्रत्याख्यातं ममानतम् ॥ ६२ ॥
मख्सूदः स्यादभिप्रायो गैरूरो गर्व ईरितः ॥
स्याद् बेमवसरो रिक्तो वित्तं मवसरो भवेत् ॥ ६३ ॥
अस्तिः स्यादैवजं नाम मसाला तु व्ययार्थकम् ॥
तदबीरः प्रयत्नः स्यादाश्रयस्तु हिमायातिः ॥ ६४ ॥
तथा किफायतिर्नाम विशेषादाय ईरितः ॥
कोशीसः पक्षपातः स्यादोशादानं तु ताकिदिः ॥ ६५ ॥
आकर्षपत्रं तलबं प्रेषणं तु रवानगी ॥
पैवस्तगी प्रविष्टं[26] स्यात् जदीदं तु नवीनकम् ॥ ६६ ॥
पुरातनं कदीमः स्यात् कृपा मेहरबानगी ॥
पूर्वान्नपालनं नाम पैरवर्षीति कीर्तितम् ॥ ६७ ॥
मुशकशो निश्चयः स्यात् प्रत्याम्नायो मुबादला ॥

---

२१. 'मंगलाचरणं फात्या'० पा० भे०
२२. 'दस्तपंजाभिधायकः' पा० भे०
२३. 'वाचाटो गलथः' पा० भे०
२४. 'नखरा' पा० भे०
२५. 'शिक्षापत्रं' पा० भे०
२६. 'विप्रविष्टं' पा० भे०
२७. 'परवेशीति' पा० भे०

निर्वाहको यख्तियारो दुश्मानः शत्रुरीरितः ॥ ६८ ॥
अजीजस्[28]तु भवेदिष्टं प्राघुणः स्यात्तु मेहमान् ॥
मेहमानी तु[29] आतिथ्यं मेज्वानी श्रेष्ठ[30]-भोजनम् ॥ ६९ ॥
अजब् नाम त्वपूर्वं स्यात्तमाशा कौतुकं मतम् ॥
उत्साहो ह्वसः प्रोक्तः कौलनामाभयं स्मृतम् ॥२७०॥
खि[31]लातः स्याद्देयवस्त्रमभ्युत्थानं तु ताजिमम् ॥
आदरस्तु तवाजू स्यात् प्रतिष्ठा इजातिः स्मृता ॥ ७१ ॥
अप्रतिष्ठा बेइजाति र्हुमतिर्मान उच्यते ॥
स[32]जा शिक्षाऽथ पैशून्यं चुगलीति प्रकीर्तितम् ॥ ७२ ॥
क्षुद्र[33]भाषा खोजगिरी स्यादामान्नं तथालफ्फो[34] ॥
विनेत्यर्थे[35] बगै नाम संबन्धो निस्बति भवेत् ॥ ७३ ॥
खुद्निस्बतिः स्वसंबन्धः खावंद स्त्वधिपोभवेत् ॥
अनावृष्टि भवेदाफत् श्वक्रेतिः फित[36]नति भवेत् ॥ ७४ ॥
पायमाली तूपहति स्ताबात्वाडम्बरः स्मृतः ॥
शेरस्तु धृष्टनामा स्यात् संरम्भः शोर-नामकः ॥ ७५ ॥
का[37]पट्यं तु दगलबाजी कलहस्तु कबाहतिः ॥
गुल्लिः कोलाहलो ज्ञेयो रा[38]स्ति योग्यं प्रकीर्तितम् ॥ ७६ ॥
प्रमाणबन्धो बंदिस्तं माकूलमुचितं भवेत् ॥
गैमाकुलं बदअमल् द्वयं चानुचितं स्मृतम् ॥ ७७ ॥
शपथस्तु दुराही स्याच्छुद्धिः पाकी प्रकीर्तिता ॥
ना[39]ग्विणनाम विज्ञेयं सर्वस्वहरणं बुधैः ॥ ७८ ॥
हुजराति नाम सां[40]द्रिः समीपस्थितिरुच्यते ॥

---

२८. 'अजीजस्तु भवेदाप्तो भवेन्मान्यस्तु मेहमान्' पा० भे०
२९. 'तारतम्यं' पा० भे०
३०. 'लग्नमुच्यते' पा० भे०
३१. 'तस्नीभः स्यात्' पा० भे०
३२. 'शास्तिः' पा० भे०
३३. 'क्षूद्रदेयं' पाठभेदः
३४. 'तयोलफा' साठेप्रत.
३५. 'अन्यथास्याद् बगनाम' पा.भे.
३६. 'फितूरतिर्भवेत्' पाठभेदः
३७. 'दुष्टता' पा० भे
३८. 'रास्तिन्याय्यः प्रकीर्तितः' पा० भे०
३९. 'नगणा०' 'नाग्विणं' 'नंगाणा' पा० भेदाः
४०. 'बुधैः' पा० भे०

पैश्चात्कृतिर्गैबती स्यात् स्वैरं स्वेच्छाविवर्तनम् ॥ ७९ ॥
खैरं कल्याणमित्युक्तं रोजा निरशनं भवेत् ॥
ज्ञेया रायजनी नीतिर्बुद्धिः स्यादकलाभिधा ॥ २८० ॥
नासिहत् स्याद् बुद्धिवादः सैंक्ती स्याद्दुःखशासनम् ॥
नजरगुजारमित्येतद् विज्ञेयं दृष्टिगोचरम् ॥ ८१ ॥
भवेल्लक्ष्मीकटाक्षस्तु नजर्दौलतनामकः ॥
फर्मावणा प्रेरणं स्यादाज्ञा हुकुमनामिका ॥ ८२ ॥
हुकुमबार्दार इत्येष आज्ञाधारक–सञ्ज्ञकः ॥
ऊर्जितं स्यात् सर्फराजी गोश्माल कर्णपीडनम् ॥ ८३ ॥
बर्दास्तिरिच्छाग्रहणं करद्रव्यं करारतिः ॥
वाजगस्तं परावृत्तादाय इत्युच्यते बुधैः ॥ ८४ ॥
तथा दत्तापहारस्तु विज्ञेयो बाजगर्दनम् ॥
शरा नाम यथाशास्त्रं स्थिरो मोकररः स्मृतः ॥ ८५ ॥
स्यीद् वृत्तिदानपत्रं तु तैवर्खमिति कोविदैः ॥
आसामी नाम पत्रं स्यादिर्सालं प्रेषितं विदुः ॥ ८६ ॥
हुजतिः प्राप्तिपत्रं स्याज्जाबः प्रत्युत्तरं भवेत् ॥
लेखागमदिनं ज्ञेयं रस्दुरी-नामकं बुधैः ॥ ८७ ॥
तथा निर्णयपत्रं तु ज्ञेयं मोर्ट्यैनजाबिता ॥
आयपत्रं जमावर्खं कतबा ऋणपत्रकम् ॥ ८८ ॥
व्ययपत्रं खर्चवर्खो लाखोटा नाम मुद्रितम् ॥
भाषापत्रं तुँ महजर मखलाशी तु निर्गतिः ॥ ८९ ॥
पाखनीशी शोधकता पूर्त्तिर्बरकातिस्तथा ॥
कीर्ति नैमोश-नाम्नी स्यान्निषेधस्तु मना स्मृतः ॥ २९० ॥
अभिदधते यवनगिरा मुखवचनं मनीषिणो जबानीति ॥
रदबदलं नाम तथा विवादमाहुर्जयः फते नाम ॥ ९१ ॥

---

४१. ' देशस्थितिर्गै० पा०भे०
४२. 'घुर्सीसं दुःख-शासनम्' पा.भे. 'शामकंम् ' साठेप्रत.
४३, 'ज्ञेयं वेतनपत्रं तु' पाठभेद.
४४ ' मोईन ' साठेप्रत.
४५. ' महशर्ते, '—' महद्शर्ते ' महझर्ते पाठभेदौ
४६. ' कीर्तिर्महन्स०' पा. भे.

स्यात् खलत्वं **हरकती** **मुँशीकीलं** विघ्नमुच्यते ॥
समुदायस्तु **मीमज़ुम्ला** **ध्यानतिः**शुद्धवासना ॥ ९२ ॥
**सरंजामी** नाम बुधा आनुकूल्यं प्रचक्षते ॥
**पर्वानगी** निदेशः स्यात् संदेशस्तु **रसानगी** ॥ ९३ ॥
इतरत्तु **दफाते** स्याद् **दरीन्वख्तस्तु** सांप्रतम् ॥
पूर्वप्रमाणमिति तत् **सदर्हू**-नामकं जगुः ॥ ९४ ॥
आशाप्रमाणं तु तथा **बर्हुकूमं** प्रचक्षते ॥
विषयो **मजकूरः** स्याद् वार्ता **खबर** नामिका ॥ ९५ ॥
**खबर्दार** स्त्ववहितः सावधानस्तथा **हुशार्** ॥
**गुजारातिः** साक्षिता स्याद्÷ **दिम्रातिः** स्यादनन्तरम् ॥ ९६ ॥
**लाबूदः** स्वल्प इत्युक्तो **मज्बूदस्तु** दृढः स्मृतः
**बेहबूदस्तु** भव्यं स्यादुपायस्त**र्दुदः** स्मृतः ॥ ९७ ॥
धर्मो[४७] **हक्क** इति प्रोक्तो **नाहक्को**ऽधर्मनामकः ॥
**गुमशुदो** गुप्त नामा स्याल् **लुगारी** लुण्ठनं स्मृतम् ॥ ९८ ॥
**जास्तं** नामाधिकं ज्ञेयं **वजायी** न्यूनमुच्यते ॥
**ज़ुलुमस्तु** बलात्कारो **जानं** जीवः[४९] प्रकीर्तितः ॥ ९९ ॥
अन्यायवार्ता **फिर्यादि** **बाजे** ज्ञेयमवान्तरम् ॥
प्रान्तो नाम **जिल्हे** **अर्जिदास्तं** विनतिपत्रकम् ॥ ३०० ॥
नैश्चिन्त्यं **बेगमी** नाम कुटुम्बं **कबिला** भवेत् ॥
अनुरूपं **वाकिफं** स्यात् तदर्थं **मुञ्रदं** भवेत् ॥ १ ॥
**मोहतादं** परिमितं युग्मं **जोडा** इतीरितम् ॥
**साजः** प्रसाधनं ज्ञेयं **सर्फा** तु हितमुच्यते ॥ २ ॥
**देहंदगी** तु दातृत्वं **बक्सीसं** पारितोषिकम् ॥
धर्मादायस्तु **खैराति** रन्नसत्रं तु **लंगरं*** ॥ ३ ॥
**चूप्** नाम तु विदुस्तूष्णीं मर्यादा **त्वदबा**भिधा ॥
अमर्यादा **बेअदबी** यथावश्यं तु **हाल्खुदम्** ॥ ४ ॥

---

४७. 'रिशकीलं' पाठभेदः
' रिक्शलिं ' पा. भे.
÷ 'ईम्रातिः' पा० भे०

४८. 'सत्ता हक्क पा० भे०
४९. 'हानिः' पाठभेदः
* 'जंगरं' पा० भे०

कैदं तु वर्म विशेयं[50] प्रेक्षणं तु मुलाहिजा ॥
अन्यायो नाम तखसीरः संमतिस्तु मुकाबिला ॥ ५ ॥
मोर्झी[51] नाम प्रातिसाक्ष्यं साहाय्यं मदतिर्भवेत् ॥
समृद्धं स्यान्मोबलगं साजीसी त्वार्जवं भवेत् ॥ ६ ॥
अप्रयत्नो नाइलाज इलाजो यत्न ईरितः ॥
कबजं देयपत्रं स्यात् स्वाधीनं काबिजं स्मृतम् ॥ ७ ॥
एकबालं तु दैवं स्याद् बख्तं भाग्यं प्रकीर्तितम् ॥
आदतस्तु स्वभावः स्यादिल्लातिर्दूषणं स्मृतम् ॥ ८ ॥
श्रेयः पुश्तपनाहस्तु सहकारी मनीषिभिः ॥
अभिवृद्धिस्तु तरकी संख्या बेरीज उच्यते ॥ ९ ॥
तेरीजं गणितं ताळा त्वैक्यमाख्यायिका बखैर् ॥
तथैवानुक्रमणिका फेरीस्तमिति भाषितम् ॥ ३१० ॥
वादिपृच्छा[52] सवालः स्याद् गणती गणना मता ॥
दिनचर्या रोजकीर्दिरावर्जा प्रासलेखनम् ॥ ११ ॥
मोफर्दो देशलेखः स्याद् यादिः स्मरणमुच्यते ॥
मश्रीफो व्ययलेखः स्यादिनामो वृत्तिनामकः ॥ १२ ॥
रवांशुद्री दापनं स्यान्मेस्तको लेखपद्धतिः ॥
अङ्गीकारः कबूलः स्याद्बादं निष्कासनं विदुः ॥ १३ ॥
हिल्ला नाम भवेद् वर्णो मोहला त्वाकृतिर्भवेत् ॥
त्यक्तादायस्तु सांडावा टिप्पणं तु खतावणी ॥ १४ ॥
भोज्यग्रामो मुकामः * स्याद् विस्तारस्तप्सिलो भवेत् ॥
अवान्तरव्ययः ख्यातो बाजेखर्चो विचक्षणैः ॥ १५ ॥
परस्थलव्ययः सद्भिर्मुजाफातिरितीरितः ॥
तथा परस्थलादाय इजाफातिरिति स्मृतः ॥ १६ ॥
तथा दापनपत्रं तु वरातमिति कीर्तितम् ॥
मुदति स्त्ववधिः प्रोक्तः अन्तरं तु तफावतं ॥ १७ ॥
नागा शून्यदिनं प्रोक्तं तारीखं तु दिनं स्मृतम् ॥

---

५०. 'विशेयमुपरोधो मुलाहिजा' पाठभेदः
५१. 'मोकबिला प्रातिसाक्ष्यं' पाठभेदः
५२. 'संवास्तु सवादस्तु' पा० भे.
* 'मुकासा' पा० भे०

मासो माह इति प्रोक्तो वर्षं सालमितीरितम् ॥ १८ ॥
आरंभस्तु शुरू ज्ञेयं मोर्तबं स्यादलंकृतिः ॥
शिक्का नाम तु मुद्रा स्याद् बारः स्याल्लेख्यनामकः ॥ १९ ॥
तालीकं प्रतिपत्रं स्यात् प्रसंगः कलमाभिधः ॥
प्रत्यासन्नस्तु हाजीरः + कागजः कागलः स्मृतः ॥ २० ॥
दस्ता + कागजमानं स्यात् पत्रं पानाभिधं भवेत् ॥
अलेखकागजः + कोराकागदः परिभाषितः ॥ २१ ॥
चवर्खी चतुरस्रं स्यात् द्विपर्णी ताव उच्यते ॥
पर्णार्धं तु भवेद् बंदः पर्णांशो वरखः स्मृतः ॥ २२ ॥
रकाना तुर्यभागः स्यातृतीयांशो मुशद्दरः * ॥
अर्धभागो भवेज्जिल्हे बितं मध्यांश उच्यते ॥ २३ ॥
अडांखस्तु समाङ्कः स्यादिरेबं वक्रलेखनम् ॥
आहुः + कागजसूत्रं तु तब्लखं नाम कोविदाः ॥ २४ ॥
जिलीदो लेखबन्धः स्याद् बस्तनी नाम वेष्टनी ॥
ज्ञेयं जिलीदपुस्तं तु पृष्ठपत्रं विचक्षणैः ॥ २५ ॥
तथा वेष्टनवस्त्रं तु रुमालः परिकीर्तितः ॥
पेटारा पेटकः प्रोक्तो जुज्दानं नाम संचिका ॥ २६ ॥

---

## ९ ॥ जनपदवर्गः ॥

विलायतिर्जनपदो [१]बैलदापत्तनं स्मृतम् ॥
नगरं पेठसंज्ञं स्यान्मौजा ग्राम इतीरितः ॥ २७ ॥
स्याच्छाखानगरं नाम हवेली बंदरं तु तत्- ॥
यद्वेलानगरं, ग्रामगणः परगणाभिधः ॥ २८ ॥
घोषस्तु मजरा खेडा खेटं वाडी तु वाटिका ॥
सुभेदारस्तु देशाधिकारीति परिभाषितः ॥ २९ ॥
तथा मुजुमदारस्तु विज्ञेयो देशलेखकः ॥
अधिकारी हवाल्दारो वीक्षकस्तु [२]निगाहवान् ॥ ३३० ॥

---

५३. निर्दोषं तु ) पा० भे.
* ' मुशद्दसः ' पा० भे०
+ ' कागल ' पा० भे०

१. ' मामलापत्तनं ' पा० भे०
२. ' निगावनः ' पा० भे०

स्थायुकस्तु तरफ्दारो दफ्तर्दारस्तु गोपकः ॥
कमावेश्दार इत्येष ग्रामसंघकरग्रही ॥ ३१ ॥
चौगला ग्रामणीः प्रोक्तो ग्रामरक्षस्तु कोतवाल् ॥
कुल्कर्णी ग्रामलेखी स्यात् पाटीलो ग्रामगोपकः ॥ ३२ ॥
जमीनजुमला नाम ज्ञेयो भूमिगणो बुधैः ॥
जिरायितं नाम तथा विज्ञेयं वृष्टिमातृकम् ॥ ३३ ॥
आहु बागायितं नाम कोविदा जलमातृकम् ॥
धुमारी भूमिगणना बटाई भाग ईरितः ॥ ३४ ॥
कैलं नाम विदुः क्षेत्रधान्यमानं मनीषिणः ॥
बाजकैलं पुनर्मानं बलूते कारवः स्मृताः ॥ ३५ ॥
मजुर्दारस्तु भृतिकः सर्बारी भारवाहकः ॥
गंजे धुजः परिज्ञेय स्तसैरं धान्यविक्रयः ॥ ३६ ॥
नफरायी हिताभासः कबूलाति स्त्वतिक्रिया ॥
पौलितः स तु पर्वर्दा कार्कूनः कार्यकारकः ॥ ३७ ॥
खरीफं कार्तिकफलं स्याद्वैशाखफलं रबी ॥
व्यवसायी मोहतर्फा शेत्कीरी तु कृषीवलः ॥ ३८ ॥
महसूलं तथा गैरमहसूलमिति द्वयम् ॥
न्यायद्रव्यं तथान्यायद्रव्यं प्रोक्तं क्रमाज्जनैः ॥ ३९ ॥
तथा बलात्कृतादायः पैदागिरिरिति स्मृतः ॥
उपायनं तु भेटी स्याद्बाकी शेष इतीरितः ॥ ३४० ॥
स्याद्वर्तमानवर्षे तु सालमजकूर-नामकम् ॥
तथा सालगुदस्ता तु गतवर्षं प्रचक्षते ॥ ४१ ॥
शेषसंबन्धिकं बाकी-बकाया इति कीर्तितम् ॥
चिरशेषस्तु सनबादबाकीति परिकीर्तितः ॥ ४२ ॥
महाल मजकूरं तु देशव्यय उदाहृतः ॥
ग्रामव्ययस्तु सादीलवार इत्युच्यते जनैः ॥ ४३ ॥

---

३. ' हुदेदारः ' साठेप्रत.
४. ' तरफदारस्तु ' पा० भे०
५. ' देशमर्मश नामकः ' पा० भे०
६. ' देशकरणः ' पा० भे०
७. ' मसातिः ' पा० भे०
८. ' शिर्भारी ' पा० भे०
९. ' खुतपुंज ' पा० भे०
१०. ' पर्वर्दातुगुणधानं ' पा. भे.
११. ' मजूरी ' पा० भे०
' मुजरी ' साठेप्रत.

द्रव्यादायो नख्तकट्बाणा नामा प्रकीर्तितः ॥
[१२]धान्यादाय स्तथा गल्लाकट्बाणा परिस्मृतः ॥ ४४ ॥
मन्किबाल इति प्राहुर्गृहीतव्ययनामकम् ॥
भाव्यादायो मुस्तकबील् पेस्तरं त्वग्रिमं भवेत् ॥ ४५ ॥
सीमा सरहद्दं देशाक्रमणं तु मुलुख्गिरी ॥
बार्दरख्तं फलद्रुक्षं जंगलं जाङ्गलं स्मृतम् ॥ ४६ ॥
बार्नगज़ंगं नाम तथा ज्ञेयं छायावनं बुधैः ॥
वृक्षसंख्या तु विद्वद्भिर्ज्ञेया न्याहल्तज्करा ॥ ४७ ॥
उजयां स्यात् प्रसरणं यात्रा तु ज़ुजयां भवेत् ॥
भूनिर्णयो जमीन्झाडा मार्गादायो जकायतिः ॥ ४८ ॥
पट्टी त्वारोपितादायः सर्वादायस्तु हाशिलः ॥
ग्रामादायो दस्तअमल् निर्गमादाय–नाम तु— ॥ ४९ ॥
[१३]निर्कालुः स्वादथोविस्वा स्थलादायः प्रकीर्तितः ॥
शिंगाशिंगोटिरित्येष श्रृङ्गादायः प्रकीर्तितः ॥ ३५० ॥
पर्णादायः पत्रकेणी संचणी सचयः स्मृतः ॥
रकमाला राजलेखा लावणी लापनं स्मृतम् ॥ ५१ ॥
अकृष्टभूमिर्नाकर्दिः कर्दिस्तु[१४] फलभूमिका ॥
दर्या समुद्रः कथितष् टोकरा स्यात्तथोडुपम् ॥ ५२ ॥
यट्टोकरे–हशीलं स उडुपादाय ईरितः ॥
जाहजं जलयानानि नौका स्यान्नाव–संज्ञिका ॥ ५३ ॥
द्वैप्यः फिरंगी मत्ता तु क्रेयवस्तु समीरितम् ॥
प्राची मश्रीख्–नाम्नी स्याद्दक्षिणा जनुबाभिधा ॥ ५४ ॥
मग्रिबाख्या प्रतिची स्यादुत्तरा दिग् भवेत् षिमाल् ॥
किब्लेनुमा–नाम जनैर्दिशा–यन्त्रमुदीरितम् ॥ ५५ ॥
अहद्स्त्वादिनामा स्यादवधि स्तहद्दः स्मृतः ॥
अथ कोठीमहालस्तु धान्यागारं प्रकीर्तितः ॥ ५६ ॥
हवाल्दारस्तस्य धान्याधिकारी परिभाषितः ॥

---

१२. ' धान्यसंघः ' पाठभेदः
' मुस्तकाबाल् ' पा. भे.
१३. ' पैजाल्नामदोषशैः ।
प्रवेशादाय ईरितः '॥
इति अधिकतरम्
१४. 'कीर्दिः स्याभ्दूमिकर्षणम्'
पाठभेदः

तत्रत्यो **निविसिंदा** तु धान्यलेखक–नामकः ॥ ५७ ॥
**कोठीवाला** धान्यमानी पशुपालस्तु **बैलका** ॥
उन्मानं **वजनी कैली** परिमाणं प्रकीर्तितम् ॥ ५८ ॥
**सुमारं** परिसंख्या स्यात् **खरीदी** क्रीत उच्यते ॥
**फरोख्तं** नाम विक्रीतं **मालिस्तं** कुट्टनं स्मृतम् ॥ ५९ ॥
**आदीदं**[15] पेषणं प्रोक्तं **कसरं** वृद्धिरीरिता ॥
**नुक्सानं** तु भवेत् क्षीणं स्याद्**दैनजिनसं** तु यत्—॥ ३६० ॥
तन्मुख्यवास्त्विति प्राहुष् **टांकष्टङ्क** इतीरितः ॥
**नवटांक** स्त्वर्धपलं **पावशेरं** पलं स्मृतम् ॥ ६१ ॥
**अच्छेरं** प्रसृतिः प्रोक्ता **शेरः** कुडव–नामकः ॥
प्रस्थस्तु **पायलीनामा** मानिका नाम **चोथवा** ॥ ६२ ॥
द्रोणो **मण** इति प्रोक्तः खारी **खंडीति** कीर्तिता ॥
**बुधला** तु कुतूनामा **बुधली** कुतुपः स्मृतः ॥ ६३ ॥
व्रीही **धान्य** इति प्रोक्तो **गोणी** नाम सम द्वयोः ॥
**भाषयोरथ**[16] **कंठाळ** इत्यसौ भारसंचकः ॥ ६४ ॥
**मूठं** तु वृषपल्याणं **वळी** शुण्डा प्रकीर्तिता ॥
वृषकश्यं **पठाडः** स्यान्नासारज्जुस्तु **वेसाणिः** ॥ ६५ ॥
**रसडी** रज्जुनाम स्यात् **सरकः** पाश उच्यते ॥
**फिर्त्तिकोठी** जनैर्बाह्यपशुकं परिभाषितम् ॥
**थटी** गोवाटिका[17] नाम **गोळी** गोपाल ईरितः ॥ ६६ ॥

---

# १० ॥ पण्यवर्गः ॥

**बुलंगा** सैन्यसंभारो **बाजारः** पण्यवीथिका ॥
**दुकानं** त्वापणो नाम **चाट्या** स्याद् वस्त्रविक्रयी ॥ ६७ ॥
भौरिकस्तु **सराफः** स्यात् **सोनारः** स्वर्णकारकः ॥
**तांबटस्ताम्रकुट्टः** स्यात् **कांसारः** कांस्यकारकः ॥ ६८ ॥

---

१५. 'हस्तमेलं पेषणं स्याद्' पाठभेदः
१६. 'भाषयोरिति' पाठभेदः
१७. 'गोवाटिकंनाम' पा० भे०

**खाती** तु लोहकारः स्यात् **सुतार**स्तक्षकः स्मृतः ॥
**कुंभार**स्तु कुलालः स्या**त्तेली** तैली प्रकीर्तितः ॥ ६९ ॥
**जुल्हाई** तन्तुवायः स्याद् **वाणी** वैश्य इति स्मृतः ॥
ताम्बूलिकस्तु **तांबोळी फुलारी** मालिकः स्मृतः ॥ ३७० ॥
**बुक्केफरोस** इति यः स स्यादामोदकारकः ॥
तथा **तारकसी** स्वर्णतन्तुकार: प्रकीर्तित: ७१ ॥
**शिंपी** तु सौचिको ज्ञेयो **जुवारी** द्युतकारकः ॥
**मणियार**स्तथा लोहविक्रयी परिभाषितः ॥ ७२ ॥
स्युः * कागजकरास्ते तु ये **कागदकुटे** इति ॥
धातुकारस्तु **ओतारी लोणारी** काष्ठविक्रयी ॥ ७३ ॥
**रङ्गाजि**वस्तु **रंगारी नीळारी** नीलकारकः ॥
**पट्टेगारः**[1] पट्टकरो **झारे** स्युर्भूमिशोधकाः ॥ ७४ ॥
तुरगासनकारस्तु वाच्यो **जिनगरो** बुधैः ॥
**नदाभ**—नामा कार्पासशोधकः परिभाषितः ॥ ७५ ॥
भवेच्छिकलकारस्तु शस्त्रशोधक—नामकः ॥
वेणुकारस्तु **बुरुडो बागवान्** फलविक्रयी ॥ ७६ ॥
आरालिको **भटारी** स्याद् भर्जकस्तु **फुटाणगार्** ॥
+आपूपकः **शिरीन्गारो भुसारी** धान्यविक्रयी ॥ ७७ ॥
**कल्हैगारः** सीसकारो **मुलामा** धातुमार्जनम् ॥
**जडया** स्याद् रत्नखचको **जोहारी** रत्नविक्रयी ॥ ७८ ॥
अजाजीवी **धनगरो हजामो** नापितः स्मृतः ॥
**चांभार** श्चर्मकारः स्यात् **सरेकोर**स्तु[2] शौण्डिकः ॥ ७९ ॥
स्यात्[3] कङ्कणकरः **कांसार्** व्यवसायी तु **बोहरी** ॥
**कैफषदोजः**[4] पादरक्षाकारकः परिभाषितः ॥ ३८० ॥
**खडावा** पादुका ज्ञेया **पैजाराः** स्युरुपानहः ॥
**मुलामगारो** धातुमार्जी **चितारी** चित्रकारकः ॥ ८१ ॥
स्यादैन्द्रजालिको **बाजगरी कर्दगर**स्तु यः—॥

---

* 'कागल' पा० भे०
१. पट्वेगार :' पाठभेदः
+ 'आपूपकस्तु शिर्णीगार' पा० भे०
२. 'सुराकारस्तु' पा० भे०
३. 'पेंढारीपौष्टिकाजीवी । खाटीको हिंसकः' पाठभेदः
४. 'कौशदोजः' पाठभेद.

स शस्त्रकारी, कवचकारकस्तु जिरेहगार् ॥ ८२ ॥
स्याच्चावडी हट्टसभा समाजो गोदरी मतः ॥
खलकः स्यान्मेहतरः श्रेणी खंब इतीरिता ॥ ८३ ॥
हुनर्बंदस्तु शिल्पी स्यान्मीर्को हट्टपतिः स्मृतः ॥
चरवर्या गोपतिः स्याद्दासी बांदीति शब्दिता ॥
डिण्डीरवस्तु धांडोरा ढालः स्यादापणध्वजः ॥ ३८४ ॥

इति श्री शिवच्छत्रपतिप्रियामात्येन नारायणाध्वरिसूनुना रघुनाथपण्डितेन शिवराजनियोगतः कृते राजव्यवहारकोशे पण्यवर्गो दशमः समाप्तः ।

---

# उपसंहारः

व्यासान्वयाब्धिचंद्रेण लक्ष्मणव्याससूनुना ॥
कोशोऽयं ढुंढिराजेन रघुनाथमुदे कृतः ॥ १ ॥
यथामतिविचार्यैव नामान्यर्थानुसारतः ॥
विहितानि मया कार्यमार्यैरत्र मनो मनाक् ॥ २ ॥
माता यस्य सतीगणार्चितगुणा राजायि नाम्नी हनू–
मद्वंशाभरणं पिताध्वरिवरो नारायणाख्यः सुधीः ॥ ॥
तेन श्रीशिवसार्वभौमनृपतिप्रेमैकधाम्ना समा–
म्नातोयं रघुनाथनाम विदुषा तोषाय कोशः सताम् ॥ ३ ॥
ताराभिख्या सुशीला प्रियमपि मनसारुंधती चानुसूया
पत्नी सीताभिधाना जगति विजयते यस्य साध्वीमयीव ॥
नारोबातिम्मपाख्यौ कुशलव सदृशावात्तकंदर्पदर्पौ ॥
विभ्राजेते सुपुत्रौ विभुरिह रघुनाथाध्वरींद्रः स जीयात् ॥ ४
बुध्यालवालजनितं कविताभिधान—
क्षोणीरुहांकुरमयं यदि दातृमेघः ॥
दानांबुवर्षपृषतैर्बहुशो विकीर्णैः
सिंचेदसावपि तदांचितपल्लवः स्यात् ॥ ५ ॥

समाप्तम्

---

५. ' हुणंबारो ' पाठभेद.

शके १६४७ विश्वावसौ फाल्गुन कृष्ण १४ चंद्रे समाप्तम् ।

गोविन्दभट्टानामिदंपुस्तकम् ॥

विटें येथील प्रतीचा शेवट 'श्री शालिवाहन शके खं खं अद्रिच चंद्रमा विलंबिवत्सरे सौम्ये पञ्चमी भृगुवासरे ॥ शके १७०० विलंबिनामाब्दे माघे मासे कृष्णपक्षे पञ्चम्या भृगुवासरे निशि प्रथम याम्यं च राजकोशग्रंथलेखनं संपूर्णम् ॥ राश:शिवस्य नगरे बापू संज्ञाभिधायिन: । स्तस्येदं पुस्तकं तेयं राजकोशस्य विस्तरम् । एकदर ग्रंथसंख्या ४०० ॥ पत्रें २४ शेवटीं विष्णु स्तुतिपट श्लोक आहे ॥ नीलरोचिर्महः ॥

**राजव्यवहार-कोश** या कोशास 'राजकोश' आणि 'राजकोषनिघण्टु अशींही नांवें आहेत. हा कोश शिवाजी महाराजांनीं अमात्य रघुनाथपंत हनुमंते यांच्याकडून करविला बहुधा तो राज्याभिषेक झाल्यानंतर इ० स० १६७६।७७ मध्यें किंवा नंतर लौकरच निर्माण झाला असावा; कारण त्या सालापूर्वी रघुनाथपंताची व शिवाजीची गांठ पडलेली नव्हती. कोश करण्याचें ठरल्यावर महाराजांच्या दक्षिण विजयाच्या धामधुमींत रघुनाथपंत गुंतला असल्यामुळें तें काम त्यानें आपला हस्तक ढुंढिराज लक्ष्मण व्यास याजकडे सोंपविलें.

राजव्यवहारांतील जुनें गीर्वाण भाषेंतील शब्द लुप्त होऊन त्यांच्या स्थळीं म्लेंच्छ अगर यवनी शब्द (अर्थात् अरबी व फारसी शब्द) राजव्यवहारांत प्रचलित झाले. त्यांचें निष्कासन होऊन पूर्वींचे गीर्वाण शब्द पुनः व्यवहारांत यावे असा हा कोश रचण्याचा हेतु होता. त्याविषयीं म्हटलें आहे—

कृते म्लेच्छोच्छेदे भुवि निरवशेषं रविकुला—
वतंसेनात्यर्थ्यं यवनवचनैर्लुप्त सरणिम् ॥
नृपव्याहारार्थं स तु विबुधभाषां वितनितुं
नियुक्तोऽभूद्विद्वान्नृपवर शिवच्छत्रपतिना ॥
सोऽयं शिवच्छत्रपतेरनुज्ञां मूर्धाभिषिक्तस्य निधाय मूर्ध्नि ।
अमात्यवर्यो रघुनाथनामा करोति राजव्यवहारकोशम् ॥

यवनी शब्द (म्हणजे फारसी व अरबी) असें वर म्हटलें आहे; तथापि कांहीं देशी व हिंदी शब्दही या कोशांत गुंफिलेले आढळतील. तसेंच नर्मदेपलीकडे मराठ्यांच्या सत्तेचा जोर झाल्यावर तिकडील बादशाही दरबाराच्या संसर्गामुळें जे शेंकडों यवनी शब्द मराठी पत्रव्यवहारांत प्रविष्ट झाले त्यांचा समावेश ह्या कोशांत अर्थात् झालेला नाहीं हेंही ध्यानांत ठेवावें.

---

६. हा सातारा येथील प्रतीचा उपसंहार आहे.

ह्या कोशाची छापील प्रत प्रथम मला माझे स्नेही कै० त्रिंबकराव बापुजी मायदेव, नागांवकर यांच्या पुस्तकसंग्रहांत मुंबईस मिळाली. रा. काशिनाथ गंगाधरजी नांवाच्या एका गृहस्थानें ती छापून प्रसिद्ध केली होती. तिजवरून व आणखी दोन प्रतींवरून मीं या कोशाची सुधारलेली आवृत्ति शके १८०२ म्हणजे इ. स. १८८० मध्यें प्रकाशित केली. तिचा खप झाल्यावर या कोशाची पुनरावृत्ति काढा म्हणून कांहीं गृहस्थांचा आग्रह पडला. म्हणून या कोशाच्या आणखी कांहीं प्रती मिळविण्याच्या यत्नास मी लागलों. एक प्रत पुणें येथें व एक विटें ( सातारा ) येथें अशा दोन प्रती मिळाल्या. नंतर माझे मित्र रा. विष्णु धोंडदेव भागवत वीरमाडकर यानीं कोल्हापुराहून तिसरी प्रत पाठविली. ही कोल्हापूर प्रत फारच जुनी व चांगली लिहिलेली असून तींत एक गोष्ट अपूर्व आहे ती ही कीं, पोथींत ह्या कोश देण्यापूर्वी ८४ संस्कृत श्लोकांचा उपोद्‍घात आणि कोशाच्या शेवटीं ५ श्लोकांचा उपसंहार हे लिहिलेले आहेत. त्यांत यवनाक्रांत पृथ्वीवर शिवाजीचा अवतार, यवनांचा उच्छेद, अमात्य रघुनाथपंत याची पूर्वपीठिका आणि कुटुंबकथा ह्या गोष्टी सविस्तर वर्णिल्या आहेत. हे गीर्वाण उपोद्‍घात आणि उपसंहार दुसऱ्या कोणत्याही प्रतींत उपलब्ध नाहींत. त्यांची दुसरी प्रत मिळविण्याचा यत्न मीं केला, पण इकडे तर तशी प्रत मिळाली नाहींच. कदाचित् तंजावर येथील पुस्तकसंग्रहांत मिळेल म्हणूनही खटपट केली, परंतु ती यशस्वी झाली नाहीं. कोणी संशोधकानें तिकडेच आणखी प्रयत्न केल्यास तशी प्रत मिळण्याचा संभव आहे; कारण ह्या कोशाची निर्मिति त्या प्रदेशांत झालेली आहे.

असो. ह्या संस्कृत उपोद्‍घातोपसंहाराच्या आणखी प्रतीची वाट न पाहतां मिळालेल्या प्रतींवरून नवीन आवृत्ति काढण्याची मी तयारी करीत होतों. इतक्यांत कळलें कीं, श्रीमंत सरदार गंगाधरराव नारायणराव आबासाहेब मुजुमदार व रा. दत्तात्रय विष्णु आपटे बी. ए. ह्यांचा हा कोश छापण्याचा विचार आहे. असें कळल्यावर मीं कोल्हापूरप्रत व पूर्वीच्या माझ्या आवृत्तींची पुणें व विटें प्रतींतील पाठांतरें नमूद केलेली प्रत अशीं त्यांजकडे पाठविलीं, आणि हें नवीन सुधारलेली आवृत्ति काढण्याचें काम त्यांजकडे सोंपविलें. हे दोघे हे गृहस्थ विद्वान असून फारसी भाषेशीं चांगले परिचित आहेत. असंस्कृत शब्दांच्या सूचीमध्यें त्या शब्दांचा अक्षरन्यास ( spelling ) फारसी लिपीनें देण्याचा माझा हेतु होता तोहि त्यांस कळविला आहे. पूर्ण करण्यास ते समर्थ आहेत. देव त्यांना सुयश देवो !

कल्याण, ता. २२ जुलई १९२५. काशिनाथ नारायण साने.

---